ईशतत्त्वम्

ईशावास्योपनिषद् टीका

पं. धरणीधर पन्त

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरातत्व प्रकाशनमाला–३३

ईशतत्त्वम्

ईशावास्योपनिषद् टीका

टीकाकार
पं. धरणीधर पन्त

अध्यक्ष नारायणप्रसाद शर्माको
अध्यक्षतामा

उपोद्घातका लेखक तथा सम्पादक
पं. देवीप्रसाद लंसाल
ज्योतिषाचार्य–महेन्द्रविद्याभूषण

श्री ५ को सरकार
शि. मं. पुरातत्व विभाग
नेपाल राष्ट्रिय–पुस्तकालयबाट प्रकाशित

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संवत् २०२२।३।२९ गते

प्रथम संस्करण १०००

(सर्वाधिकार सुरक्षित)

मूल्य–

मुद्रकः– श्री ५ को सरकारको छापाखाना
काठमाडौं, नेपाल ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयसूची

१. श्री निर्देशकज्यूको वक्तव्य	क
२. अध्यक्षज्यूको प्रस्तावना	ग
३. उपाध्यक्षज्यूको अंग्रेजीमा संक्षिप्त पुस्तकपरिचय	छ
उपोद्घात	
४. ग्रन्थपरिचय	१
उपनिषद् र महाभारत	३
उपनिषद् र गीता	४
देवता र ऋषि	७
५. टीकाकारपरिचय र रचनासमय	१२
६. टीकारचनाहेतु	१३
७. ऐतिहासिकसार	१५
८. टीकाको ऐतिहासिक महत्व	१६
९. **मूलभाग**	२१
१०. ग्रन्थसार	९३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वक्तव्य

यस प्रकाशनका बारेमा विशेष जानकारीकालागि पुस्तकको "ग्रन्थपरिचय" नै प्रशस्त छ जस्तो मलाई लाग्दछ। अध्ययनको क्रममा पाठकवर्गलाई यो स्पष्ट हुने छ कि "ईशतत्वम्" ईशावास्य उपनिषद्को टीका हो। उपनिषद्, ब्रह्मसूत्र, भगवत्गीतालाई वैदिक परम्परा मान्ने सम्प्रदायले यसलाई सबैभन्दा मुख्य ग्रन्थ मानेका छन्। यिनका हाल पाइने प्राचीन भाष्यहरुमध्ये सबभन्दा प्राचीन शंकराचार्यको शाङ्करभाष्य हो। यो भाष्यले 'कर्म संन्यास' को बाटो लिएको छ। शंकराचार्यको जन्म संवत् ८४५ मा भएको हो। यस पछिका सबै सम्प्रदायले यसै मार्गलाई आधार मान्दै आएका थिए।

यहाँ एउटा अर्को विचारणीयकुरा पनि छ। संवत् १९६७ मा बालगङ्गाधर तिलकले शंकराचार्यको 'कर्मसंन्यास' को खण्डन गर्दै सर्वप्रथम कर्मयोगको बाटो लिएँ भनेर आफ्नो गीता-रहस्यमा लेख्नु भएको छ तापनि नेपालका पण्डित धरणीधर पन्तज्यूले संवत् १९९३ भन्दा पहिले सं. १८८८ पछि शंकराचार्य-को 'कर्मसंन्यास' लाई खण्डन गरी कर्मयोगको बाटो लिएको हुनाले

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कर्मयोगको प्रथम पथ प्रदर्शकको श्रेय नेपाल र नेपालीले नै पाउनु पर्ने स्पष्ट छ ।

यसको वास्तविक सार आजीवन फलको इच्छा नराखी सत्कर्म गर्दै जानु नै हो । उपरोक्त आदर्शलाई मन, वचन, कर्मले ग्रहण गरी तदनुरूप कार्य गर्नु नै महानता हो र मनुष्यत्वको लक्षण पनि ।

अन्तमा, यसको प्रकाशनका लागि मेहनत गर्नु हुने सम्पादक-ज्यू र अन्य सहयोगीहरुका साथै छापाखानालाई समेत हार्दिक धन्यवाद दिन्छु ।

रमेशजङ्ग थापा

सं२० २०२२।३।२९ निर्देशक

श्री ५ को सरकार, पुरातत्वविभाग

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रस्तावना

राष्ट्रियपुस्तकालयले जनपुस्तकालयको रूपमा सर्वसाधारण जनताको सेवाको साथसाथै पुस्तकालयका अप्रकाशित महत्वपूर्ण ग्रन्थहरूको सम्भाव्य साधनहरूको आधारमा चयन गर्दै प्रकाशन गरिरहेको कुरा पूर्व प्रकाशित कृतिहरूमा उल्लेख गरिसकिएको छ । यस क्रममा पुस्तकालयको यो नवौं प्रकाशन हो ।

जहाँसम्म यस पुस्तकको परिचयको प्रश्न छ, त्यस सम्बन्धमा श्रीनिर्देशकज्यूको यो सारगर्भित वाक्यनै पर्याप्त हुनेछ "यस प्रकाशनका बारेमा विशेष जानकारीका लागि पुस्तकको ग्रन्थपरिचय नै प्रशस्त छ जस्तो मलाई लाग्दछ" । निर्देशकज्यूका स्पष्ट पदावलिहरूमा पुस्तकको समस्त विषय वस्तुको तेरिज खिचिएको र पूर्ण परिचय उल्लिखित शीर्षकमा नै परि सकेकोले यस विषयमा केही अधिक लेख्नु पिष्टपेषणमात्र हुनेछ भन्ने मलाई लाग्दछ ।

यस प्रकाशनको चयनका सम्बन्धमा केही शब्द उल्लेख गर्न आवश्यक छ भन्ने पुस्तकालयको धारणा छ । स्पष्ट शब्दमा ऐतिहासिक दृष्टिकोणबाट महत्वपूर्ण सम्झेर नै यसको चुनाव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गरिएको हो । यस पक्षबाट यसको के कति महत्व छ भन्ने कुरा श्रीनिर्देशकज्यूको वक्तव्यको दोश्रो अवतरणबाट छर्लङ्ग हुन्छ । श्रीबालगङ्गाधर तिलकको उल्लिखित "गीतारहस्य" नामक पुस्तक पुस्तकालयमा उपलब्ध छ र, उक्त पुस्तक र यस पुस्तकालयको "ईशतत्वम्"को तुलनात्मक अध्ययन तथा अनुसन्धान गरेर नै सकभर सर्वसाधारणले हृदयंगम गर्न सक्ने रूपमा यो प्रकाशन जनसमक्ष राख्ने चेष्टा गरिएको हो । श्री तिलकले कसरी कर्मयोगको बाटो लिने सर्वप्रथम व्यक्तिमा स्वयं आफूलाई घोषित गरेका छन् र प्रस्तुत पुस्तकका नेपाली लेखक धरणीधर पन्तको टीकामा कर्मयोगको कस्तो स्पष्ट व्याख्या चित्रित छ भन्ने कुरा यस पुस्तकको " ऐतिहासिकमहत्व " शीर्षक अन्तर्गत उद्धृत लेखकहरूका आफ्नै वाक्य बाट छर्लङ्ग हुनेछ । प्रस्तुत टीका लेखकले श्री ५ राजेन्द्रविक्रमको समयमा लेखेका हुँदा तत्कालीन परम्परा अनुसार प्रारम्भमा मङ्गलाचरण र त्यसपछि श्री ५ पृथ्वीनारायणशाह देखि लिएर श्री ५ राजेन्द्रविक्रम शाह सम्मको वंशावलि र प्रशस्तिको राम्रो वर्णन गरेका छन् । उक्त प्रशस्तिको अनुवाद "ऐतिहासिकसार " शीर्षक अन्तर्गत परेको छ ।

पुस्तकालयबाट प्रारम्भमा प्रकाशित गरिएका केही पुस्तकहरू तत्काल अनुवाद सहित निकाल्न कठिन हुँदा संस्कृत मूल मात्र प्रकाशित गरिएको र यतिले मात्र सर्वसाधारणलाई बुझ्न र त्यसबाट विशेष लाभ उठाउन कठिन भै रहेको कुरा अनुभव गरेर सकभर बुझ्न सरल बनाउने चेष्टा पुस्तकालयले गरेको छ । यस प्रकारको प्रयास हालै नववर्ष दिवसको उपलक्षमा प्रकाशित

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"प्रशस्ति–रत्नावलि" मा पनि गरिएको छ । यस उद्देश्यलाई ध्यानमा राखेर नै प्रस्तुत पुस्तकको मूल भागलाई जस्ताको तस्तै राखेर प्रत्येक मन्त्रको नेपालीमा भावानुवाद, ग्रन्थ परिचय, टीकाकारपरिचय, टीका रचना हेतु, ऐतिहासिकसा र, टीकाको ऐतिहासिक महत्व आदि विविध पक्षको व्याख्याद्वारा सकभर सरल, आकर्षक र उपयोगी बनाउने चेष्टा गरिएको छ । यसको उपादेयता र महत्वको मूल्याँकन स्वयं पाठक वर्गले नै गर्नु हुनेछ भन्ने पुस्तकालयको धारणा छ ।

यस पुस्तकको मूलभाग उतारको साफी गर्नमा पं. यज्ञानन्द गुभाजु, मूल उतारको संशोधन गर्नमा पं. देवराज पौडेल र पुस्तकको संपादन तथा श्रीतिलकको गीतारहस्यसंग तुलनात्मक अध्ययन-अनुसन्धान गरेर ऐतिहासिक महत्वको उद्धरण, पुस्तक-का संस्कृत मूल मन्त्रहरूको भावानुवाद आदि गर्नमा धेरै परिश्रम गर्ने पं. देवीप्रसाद लंसाल विशेष धन्यबादका पात्र हुनु हुन्छ । श्रीलंसालले यस भन्दा पूर्व छवटा पुस्तकहरूको सम्पादन गरि सक्नु भएको छ र यो उहाँको सातौं प्रयास हो । आशा छ सबैबाट निजहरूको परिश्रमको कदर गरेर उत्साह बढाउने काम हुनेछ । यसो भएमा पुस्तकालयले उहाँहरूबाट अझ बढी देन पाउने छ र पाठक वर्ग बढी लाभान्वित हुन सक्ने छ । अन्तमा पुस्तकालयका सबै सहयोगी साथीहरूलाई धन्यबाद दिएर आफ्नो गन्थन टुंग्याउँ छु ।

नारायणप्रसाद शर्मा

अध्यक्ष

नेपालराष्ट्रिय पुस्तकालय

सं २०२२।३।२९।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

INTRODUCTION

The Nepal National Library has brought out the present volume in the hope that it will thereby be able to render some help to the general readers who are interested in the pursuit of the vedic studies. It may be noted that, inspired by this object, the Library has so far issued in the printed form eight ancient manuscripts on different subjects within the past three years.

The present publication is a commentary on *Eeshavasyopanisad*, the Vedic text, the commentator being a Nepalese scholar, Dharanidhar Pant. Born in Baglung (West Nepal), he was the grandson of Pandit Harinidhi Pant.

In the last quarter of the 8th century Shree Shankaracharya, the exponent of the Advaita (non-dualistic) philosophy, wrote a number of commentaries on the Vedic texts incltuding the *Eeshavasyopanishad*. He advanced the thesis that

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

renunciation of action (Karma) should follow full enlightenment. That, he contended, was the noble path of truth. Shree Shankaracharya was followed by a host of commentators who kept close to the line enunciated by the Master. In their enthusiasm to bolster up the thesis they went to the extent of adroitly manipulating the text to suit their own pre-conceived notions. The importance of Dharnidhar's commentary lies in the fact that he discarded all prejudices and looked at the whole field with unclouded eyes and drew his own conclusions as his reading of the text suggested. In the process he strongly refuted the views of Shree Shankaracharya and others. According to him, the interpretations framed by them were totally unwarranted. They were neither supported by the wordings of the text nor were they tenable on purely philosophical grounds. He pointed out that renunciation of action was nowhere indicated in the text. It rather tended to lay emphasis on the continuance of action throughout the whole life cycle even after the attainment of enlightenment.

Dharanidhar wrote his commentary somewhere between 1832, the year in which Queen Tripura Sundari died, and 1838 which saw the

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

fall of General Bhimsen Thapa. It coincided with that period in the Nepalese history when King Rajendra Bir Bikram Shah Deva assumed full powers of the State. The commentator, speaking of the reasons that inspired him to undertake the task, says that once he saw in his dream King Rajendra seated before the learned scholars and savants asking questions upon questions in order to enlighten himself on the Vedas and other scriptures. On waking up he conceived the idea of writing a commentary on *Eeshavasyopanisad* and making a present of it to the King, who cherished such deep interest in matters spiritual. In one of the verses of the commentary the author says that his only motive was to follow the footsteps of his forefathers in discharging the duty that he owed to the King as a loyal subject.

In his dedicatory verses he refers to the Shah kings from Prithivi Narayan to Rajendra and sets forth the leading traits of their character and the climactic points of their career, which provides reliable source materials for the facts and figures connected with the history of those days.

In the field of philosophy, the doctrine of Karma Yoga which he expounded constitues a

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

pioneering work. His work precedes that of Bala Gangadhar Tilak of India, who had laid claim to his being the first in the field. In point of fact his *Gita Rahashya*, on the basis of which he had made this claim, saw the light of the day nearly a century after the *Eesavasyopanisad* of Dharanidhar Pant. This is a great achievement of which every Nepalese can be legitimately proud. We can be certain that as more and more research is undertaken, we shall come across many more scholars and thinkers of the stature of Dharnidhar who have lighted the torch to pierce the darkness surrounding the spiritual world. It is not for nothing that the Himalayas have been described as the home of seers and sages.

13–7–1965.

Shankar Nath Adhikaree

Vice-Chairman

Nepal National Library.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपोद्घात

ग्रन्थपरिचय

यो ईशावास्योपनिषद् शुक्लयजुर्वेद संहिताको चालिसौं अध्याय हो । मन्त्र भागको अंशहुनाले यसको विशेष महत्व छ । त्यसैले होला उपनिषद्हरुमा यसको पहिलो स्थान छ । शुक्लयजुर्वेदका पहिलेका उनन्चालिस अध्यायसम्म कर्मकाण्डको वर्णन गरिएको छ । यो उक्त संहिताको अन्तिम अध्याय हो र यसमा भगवत् तत्त्वरूप ज्ञानकाण्डको निरूपण गरिएको छ । यसको पहिलो मन्त्रमा "ईशावास्यम्" वाक्य भएकाले यसको नाम "ईशावास्य" रहेको हो । यस उपनिषद्का टीका विभिन्न संप्रदायका आचार्यहरूले आफ्ना–आफ्ना संप्रदायमा ढलकाएर लेखेका छन् । "ईशतत्त्वम्" यो टीकाका लेखक नेपालदेशीय विद्वान् धरणीधर पन्त गृहस्थ हुनाले भगवान्को आज्ञा पनि निष्काम कर्म गर भन्ने भएकाले उनले यो टीका कर्मयोग पट्टि ढल्काएर लेखेका छन् । यो टीका यस्तो भन्नु त व्यर्थछ किनकि सुयोग्य पाठक वर्गले यसको श्रेणी आफै छुट्याउने छन् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कर्म सकाम-निष्काम जस्तो सुकै भए तापनि फल प्राप्तिको आशा नलिई कर्तव्य-कर्म गर्दै रहनु र भविष्यमा त्यसबाट प्राप्त हुने सुख दुःखलाई समान रूपले भोग्न तयार रहनु हाम्रो कर्तव्य हो । यसो गऱ्यौं भने अमर्यादित तृष्णा र असन्तोष जनित दुष्परिणामबाट हामी बच्न शक्तछौं । अकर्मण्यता बाट बची हाम्रो मनोवृत्ति शुद्ध भएर प्राणिमात्रका लागि हितकर हुन्छ । यो निश्चित छ कि फलाशा त्यागेतापनि इन्द्रिय र मनलाई वैराग्यद्वारा पूर्णतया दबाउनु पर्दछ । वैराग्यद्वारा इन्द्रियलाई स्वाधिनमा राखेर निष्काम बुद्धिले लोकसंग्रहका लागि तिनलाई आफ्ना–आफ्ना व्यापारमा लाग्न दिनु अर्कै कुरा हो । इन्द्रियको व्यापार त रोक्त छ तर मनले भने निरन्तर तिनै वस्तुको चिन्तन गर्दछ भने त्यो सरासर आडम्बरी हो । जो वैराग्यले मनलाई दबाएर लोक संग्रहका निमित्त इन्द्रियहरूलाई आफ्ना–आफ्ना विषयमा रही रहन दिन्छ, त्यो श्रेष्ठ पुरुष हो । बाह्य जगत् वा इन्द्रियको व्यापार हामीले उब्जाएको होइन, ती सब स्वभाव सिद्ध हुन् । मनो निग्रह पूर्वक फलाशा छोडी सुख दुःखलाई समान भोग्य मानेर निष्काम बुद्धिले लोक हितका लागि सबै कर्म शास्त्रोक्त रीतिले गर्दै रहनु नै श्रेष्ठ तथा आदर्श मार्ग हो । जस्तै भगवान् श्रीकृष्णले भन्नु भएको छ—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्म फलहेतुर्भूः मा ते संगोऽस्त्व कर्मणि।। (गी.२।२७)

कर्म गर्नलाई मात्र तिम्रो अधिकार छ, फल पाउनू वा नपाउनू कहिल्यै पनि तिम्रो अधिकारमा छैन । यस निमित्त

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'मेरा कर्मको यो फल मिलोस्' यो हेतु मनमा राखेर काम गर्ने न गर र कर्म नगर्नाको आग्रह पनि नगर ।

यी सिद्धान्त सबै वेदान्त दर्शनका हुन् । वेदान्त शास्त्रको मूल ग्रन्थ उपनिषद् नै हो । त्यस पछि व्यासज्यूले ब्रह्मसूत्र र श्रीमद्भगवद्गीताको निर्माण उपनिषद्का आधारमा नै गरेका हुन् । यस पछि नाना संग्रदायका आचार्यले आफ्ना–आफ्ना संप्रदायमा ढालेर तयार गरिएका वेदान्तका ग्रन्थहरू प्रशस्त पाइन्छन् । जसले जुनसुकै संप्रदायमा ढालेतापनि त्यसको आधारशिला उपनिषद् नै हो । ब्रह्मसूत्र, गीता, भागवत्, महाभारत आदिमा पाइने अध्यात्मज्ञान सबै उपनिषद्बाट नै लिएइको हो ।

उपनिषद् र महाभारत

महाभारतमा ठाउँ–ठाउँमा उपनिषद्हरूको उल्लेख गरिएको पाइन्छ । अश्वपति राजाका मुखबाट निक्लिएका शब्द उक्त राजाको प्रसङ्ग आउँदा महाभारतमा र उपनिषद्मा एउटै छन् ।

जस्तैः–

न मे स्तेनो जनपदे न कदर्यो न मद्यपः ।
नानाहिताग्निर्ना विद्वान् न स्वैरी स्वैरिणी कुतः ।।
(छा. ५. ११. ५)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न मे स्तेनो जनपदे न कदर्यो न मद्यपः ।
नानाहिताग्निर्ना यज्वा मामकान्तर माविश : ।।
(शा. प. ७७. ८)

शरीर एवं रथ आत्मा एवं सारथि र इन्द्रिय तथा घोडा-हरूको पूर्ण उपमानोपमेय भाव उपनिषद्मा जस्तै महाभारतमा पनि पाइन्छ ।

जस्तैः--

आत्मानं रथिनं विद्धि शरीरं रथमेवतत् ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ।। (कठ.१.३.३)
रथः शरीरं पुरुषस्य दृष्टमात्मानियन्तेन्द्रियाण्याहुरश्वान् ।
तै रप्रमत्तः कुशली सदश्वैर्दांतः सुखं याति रथीवधीरः।।
(बन प. २२१.२३)

उपनिषद् र गीता

त्यस्तै गीता र उपनिषद्को पनि समानता प्रसस्त मात्रामा पाइन्छ । उपनिषद् गद्यमय र पद्यमय छन्; गद्यमय उपनिषद्का वाक्यहरू पद्यमय गीतामा जस्तो छ त्यस्तै उतार्न नमिलेतापनि छान्दोग्य उपनिषद् आदिका पाठक वर्गले सजिलैसंग सम्झन शक्तछन् जस्तै, कि "जो छ त्यो छ, जो छैन त्यो छैन" ।

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्त स्त्वनयो स्तत्व दर्शिभिः ।।
(गीता २. १६)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादि विचार सबै छान्दोग्य उपनिषद्बाट लिइएको छ ।

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम् ।।(गी१३.१७)

मात्रा स्पर्शास्तु कौन्तेय शीतोष्ण सुख दुःखदाः ।
आगमापायिनोऽनित्या स्तां तितिक्षस्व भारत ।।
(गी.२.१४)

इत्यादि विचार बृहदारण्य उपनिषद्बाट लिइएको हो । तर गद्य उपनिषद्बाट पद्यतर्फ जान्छौं त यो समानता अझ अधिक पाउछौं । किन कि पद्यात्मक उपनिषद्का वाक्यांशहरू गीतामा उही नै सारिएको छ । उदाहणरको लागि कठोपनिषद्को यो श्लोक ।

जस्तैः–

श्रवणयापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवोऽयं न विद्युः ।

आश्चर्यो वक्ता कुशलोऽस्यलब्धाऽऽश्चर्यो ज्ञाता कुशलानुशिष्टः ।। (कठ. २.७.)

आश्चर्य वत्पश्यति कश्चिदेन आश्चर्यवद्वदति तथैव चान्यः ।

आश्चर्य वच्चैनमन्यः शृणोति श्रुत्वाप्येवं वेदन चैव कश्चित् ।।(गीता २।२७)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जस्तैः–

हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ।। (कठ.२.१९)

न जायते म्रियते वा कदाचि–
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ।। (गी २.२०)

त्यस्तै समता निम्नलिखित श्लोकहरूमा पनि पाइन्छ ।

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च य द्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि ।।
(कठ २. १५)

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये ।।
(गीता८. ११)

त्यस्तैः–

इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धि र्बुद्धे रात्मा महान्परः ।। (कठ३.१०)

इन्द्रियाणि पराण्याहु रिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परत स्तु सः ।। (गी३.४२)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपर्युक्त उदाहरणबाट यो सिद्ध भयो कि गीता–महा भारतहरूको निर्माण उपनिषद्हरूका आधारमा भएको रहेछ । गीतामा जस्तै उपनिषद्हरूमा पनि यज्ञयागादिलाई गौणमानेका छन् । व्यक्त मनुष्य रूपधारी ईश्वरको उपासना उपनिषद्-हरूमा पाइदैन । उपनिषद्ले शुरुमा अव्यक्त र निर्गुण ईश्वरको आकलन हुन अत्यन्त कठिन हुने हुनाले मन, आकाश, सूर्य, अग्नि आदि व्यक्त प्रतिकहरूको वर्णन गरेर उपासना मार्गलाई प्रसस्त गराएको छ र स्थान स्थानमा रुद्र, ब्रह्मा, अच्युत यी नारायणका रूप हुन् भन्ने पनि पाइन्छ । यसरी राम्रो सित मनन गरेर हेर्दा अधिकांस उपनिषद्हरूको झुकाउ निष्काम कर्मयोगद्वारा विशुद्ध ज्ञानको उपासना तर्फ नै देखिन् छ । 'ईशावास्यम्' उपनिषद्मा जस्तै अरु उपनिषद्मा पनि "कुर्वन्नेवेहकर्माणि" जस्ता आमरणा-न्त कर्म गर्दै रहू भन्ने अमरवाणी प्रसस्त पाइन्छन् । अध्यात्म ज्ञान र सांसारिक कर्ममा रहेको विरोधलाई समन्वय गर्ने प्राचीन-कालदेखि चलि आएको कर्मयोगको गीतामा जो वर्णन छ । त्यस लाई 'ईशावास्यम्' उपनिषद्को विशदव्याख्या भनेमा अत्युक्ति हवैन ।

देवता र ऋषि

अविदित्वा ऋषिं छंदो दैवतं योगमेव च ।
योऽध्यापयेज्जपे द्वापि पापीयाञ्जायते तु सः ।। (स्मृति)

जुन सूक्त वा मन्त्रमा जसको वर्णन हुन्छ त्यस सूक्त अथवा मन्त्रका त्यैही नै देवता मानिन्छन् । कुनै सूक्तमा सुरुदेखि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आखिरीसम्म देवता वाचक यौटै शब्द प्रयोग गरिएको पाइन्छ, कति यस्ता सूक्त छन् कि एक देवता वाचक अनेक नाम त्यस सूक्तका अनेक मन्त्रमा प्रयोग एभका पाइन्छन् । जसमा देवताको एक नाम प्रयोग हुन्छ त्यस सूक्तका देवताका विषयमा कुनै संदेह हुदैन , तर जुन सूक्तमा विभिन्न नामको उपयोग हुन्छ त्यस सूक्तका देवताको निर्णय गर्नलाई शंका उठ्दछ । यस निमित्त यस अध्यायका देवताका विषयमा विचार गरूं । देवताको निश्चय गर्ने रीति यो हो कि पहिले प्रत्येक मन्त्रका देवता सूचक मन्त्र छुट्याउँ ।

जस्तैं:–

मन्त्र	देवता	परिशेष
१ ईशावास्यं	ईश	ईश
२ कुर्वन्नेवेह		
३ असूर्यानाम		
४ अनेजदेकं	एकं, एतत्	
५ तदेजति	तत्	
६ यस्तु सर्वाणि	आत्मा	आत्मा
७ यस्मिन्त्सर्वाणि	,,	,,
८ स पर्यगात्	स, कवि	
९–१४ अंधं तमः		
१५ वायु रनिलं	ॐ	ॐ
१६ अग्नेनय	अग्नि	अग्नि
१७ हिरण्मयेन	सत्यं	सत्यं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवता वाचक जती शब्द छन् ती बाट सर्वनाम र विशेषण लाई छोडेर जो मुख्य-मुख्य शब्द छन् ती यी हुन् । "ईश, आत्मा, ॐ, अग्नि, सत्यं" वैदिक रीती बाट यी शब्द यौटै देवता वाचक हुन् यसमा शंका छैन शंका केवल अग्निमा रह्यो। यसका वारेमा ऋग्वेदमा यस्तो छ ।

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिवः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुः ।।
(ऋ. १.।१६४।४६)

एकै सद्वस्तुको नाम ज्ञानी जन धेरै प्रकारले वर्णन गर्द छन् । त्यही यौटालाई इन्द्र, मित्र, वरुण, अग्नि, सुपर्ण, यम मातरिश्वा आदि नाम बाट पुकार्द छन् । यस मन्त्रको 'अग्नि' शब्द ईशोपनिषद्मा आएको छ । यस मन्त्र बाट यो स्पष्ट भयो कि नाम भेद बाट देवताको भेद हुदैन ।

त्यस्तैः–

तदेवाग्नि स्तदा दित्य स्तद्वायु स्तदु चन्द्रमा ।
तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः ।।(यजु३२।१)

त्यैनै 'अग्नि' हुन् त्यैंनै आदित्य हुन त्यैनै वायु हुन्, त्यनै चन्द्रमा हुन् त्यैनै शुक्र हुन्, त्यैनै ब्रह्म र आप हुन् र प्रजापति पनि हुन् । यस मन्त्रबाट स्पष्ट हुन्छ कि अग्नि, आदित्यादि नाम बाट उनै परब्रह्म परमात्मा ईश्वरको वर्णन हुन्छ । त्यही एक आत्मा अग्नि आदि रूपमा काम गरिरहेको छ । अतः अग्निको वर्णन बाट उसै परमेश्वरको वर्णन हुन्छ । अतः यस उपनिषद्मा जो अग्नि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्द आएको छ त्यो ब्रह्म, आत्मा, ईश आदि शब्दको पर्याय वाचक हो र यस अध्यायमा यौटै ब्रह्मको वर्णन गरिएको छ ।

कुनै कुनै पुस्तकमा यजुर्वेद संहिताको ४० सौं अध्यायका "ऋषि दीर्घतमा," हुन् भन्ने पाइन्छ । तर—

ऋचं वाचं पञ्चाध्यायी दध्यङ्ङाथर्वणो ददर्श ।

(यजुः सर्वानुक्रमणी ४।५)

यजुर्वेदका अध्याय ३६ देखि ४० सम्मको पाँच अध्यायका दध्यङ् अथर्वा ऋषि हुन् ।

आत्मदेवत्य अनुष्टुप्छन्दस्कोऽध्यायो दधीचाथर्वणेन दृष्टः ।

(महीधरभाष्यम्)

ईशावास्यं । तिस्रोऽनुष्टुभः दध्यङ् आथर्वणऋषिः ।

(उवट भाष्यम्)

ईशावास्य यस अध्यायका दध्यङ् अथर्वा ऋषि हुन् । यी अथर्वाको ब्रह्म वर्णनका साथ वेदमा संवन्ध छ र यसैले अथर्व वेदको नामनै "ब्रह्मवेद" रहेको हो ।

श्रेष्ठो हि वेदस्तपसोऽधि जातो ब्रह्मज्ञानां हृदये सं बभूव ।

(गो. ब्रा. १।९)

एतद्वै भूयिष्ठं ब्रह्म यद् भृग्वंगिरसः । येंऽगिरसः स रसः । येऽथर्वाण स्तद्भेषजम् । यद्भेषजम् तदमृतम् । यदमृतंतद ब्रह्म । (गो. ब्रा. ३।४)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चत्वारो वा इमे वेदा ऋग्वेदो यजुर्वेद सामवेदो ब्रह्मवेदः ।
(गो.ब्रा. २।१६)

वेद चार छन् ऋग्वेद, यजुर्वेद, सामवेद, एवं ब्रह्मवेद । यसमा अथर्व वेदको नाम ब्रह्मवेद भन्ने आएको छ । अथर्व वेदमा आत्मा र ब्रह्मका सूक्तहरू धेरै हुनाले यो नाम सार्थकै छ । यो ऋषिको नाम हो गोपथमा यसको व्युत्यत्ति यसरी दिएको छ ।

तद्यदब्रवीदथार्वाङ् नं... ... ...अन्विच्छेति तदर्थवाऽभवन्।
(गो.ब्रा.१।४)

" अथ अर्वाक् " यसो भन्दा "अथर्वा" भनिएको हो । यसको अर्थ यो हो परमेश्वरलाई बाहिर न खोज आफुमा नै खोज जसले भन्यो 'त्यो अथर्वा' नामले प्रसिद्ध भयो ।

अथर्वाणः अथनवन्तः, । थर्वतिश्चरतिकर्मा तत्प्रतिषेधः ।
निरु.नै. ११।२।६)

"अथर्व" को अर्थ स्थिर र थर्वको अर्थ गतिशील, यस-निमित्त "अथर्वा" को अर्थ गति रहित हुन्छ ।

योगसाधन पछि मनलाई स्थिरता, एकाग्रता, अचञ्चलता सिद्ध हुन्छ, यसैको सूचक यो शब्द हो । यस निमित्त यस अध्याय-का "अथर्वा" ऋषिको नामले नै भन्दछ कि यस अध्यायमा ब्रह्म विचार हुन्छ । यसैले यस अध्यायमा आएका अग्नि आदि शब्द जो जति आउँछन् ती ब्रह्म वाचकै हुन् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

टीकाकारको परिचय र समय

ईशावास्य उपनिषद्का टीकाकार धरणीधर पन्त पश्चिम पर्वत जिल्ला (वागलुङ) का राजा मलयवमका पण्डित प्रेमनिधिका भाई हरिनिधिका नाति हुन् । यो कुरा स्वयं लेखकले नै यसै ग्रन्थका आरम्भका दसौं पद्यमा लेखेका छन् ।

श्रीमत्प्रेमनिधिद्विजानुजगुणज्येष्ठोऽभवत्पण्डितो–
वादे चित्रधराचिताः सुधीर्हरिनिधिस्तस्माच्च रेवाधरः ।
तत्पुत्रो धरणीधरः कृतमतिर्वक्ता निबन्धाध्वरे
राजासौ क्रतुजन्मकीर्तिफलभाग्भूरिस्वभूर्दक्षिणा ।।

राजधानिलाई पूर्व भनेर पुस्तकमा जनाएकाले यो टीका तनहूँमा वसेर लेखेको अनुमान हुन्छ । सम्भवतः हरिनिधिका नाती धरणिधर पन्त तनहूँमा आएका थिए । यिनले युवावस्थामा प्रवेश गरेका श्रीराजेन्द्रवीरविक्रम शाहको वर्णन गरेका हुनाले र भीमसेन थापालाई भीमसिंह भनेर प्रभावशाली वताएका हुनाले यिनको पतन हुनु (संवत् १८९३) भन्दा पहिले र महारानी ललितत्रिपुरसुन्दरीको देहान्त (संवत् १८८८) भन्दा पछि लेखिएको अनुमान हुन्छ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

टीकारचनाहेतु

लेखकले टीका लेखनाको कारण दर्शाउँदै निम्नलिखित पद्यहरू लेखेका छन् ।

स्वप्ने निरीक्ष्य नरवाहनतामुपेतं
श्रीरङ्गनाथबुधसेवित सव्यपार्श्वम् ।
तम्भीमसिंह मुखमंत्रिवरैः परीतं
गुह्येश्वरीनिकटकल्पतरोरधस्तात् ।।
पृच्छन्तमर्थमुरुधाविविधश्रुतीनां
सिद्धान्ततत्वविदुपासितपादरेणून् ।
विद्वत्तमानथ सदर्थ रुचिम्प्रसन्न
वक्त्रारविन्दमुपलभ्य मुदं गतोऽस्मि ।।
ईशावास्यव्याख्यया तोषितो मे
किञ्चित्प्रादात्तद्गृहीत्वा प्रबुद्धः ।
तत्संतोषायेशस्त्वं गुरुक्तीः
स्मारं स्मारं वच्मि सारं श्रुतीनाम् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वप्नमा नरयानमा चढेका श्रीरङ्गनाथज्यू र प्रधानामात्य भीमसेन थापा एवं भाई भारदारद्वारा सेवागरिएका जगदम्बा गुह्येश्वरी नजिकै कल्पवृक्षका छहारिमा रही, उपस्थित विद्वान्-हरूसंग वेद–वेदाङ्गका प्रश्न–प्रतिप्रश्न गरी रहनु भएका समयमा प्रसन्न वदन श्रीराजेन्द्रवीरविक्रमशाह देवलाई मैले ईशावास्य-को व्याख्या सुनाएँ। त्यस पछि मदेखि प्रसन्न भएकाले राजा बाट केही द्रव्य पाएँ। त्यो पाउँनाकासाथ मेरोनिद्रा खुल्यो। लेखकले यि कुरा आरम्भमा लेखेका छन्। उप–संहारमा यस्तो लेखेका छन्

यत्पूर्वजः क्षितिपति र्मम पूर्वजेन
सम्पूजितो नवमितैर्निधिभिर्निवद्धैः।

सोऽयं गतानुगति केन मया स्वकीय
वेदान्त तत्व वचनैः परितोषितोऽस्तु ।।

(लेखको भनाई यो छ कि श्री ५ का पूर्वजको मेरा पूर्वजले जस्ता हिसावको सेवा गर्दै आएका थिए मैले पनि आपना पूर्वजको सेवानुसार यो 'ईशतत्वम्' ईशावास्यको व्याख्या चढाएँ यसै व्याख्याले मदेखि सन्तोष हुनु हवस्)

विद्वान् लेखकले यस्तो लेखेतापनि हाम्रा धर्मग्रन्थहरू साराका सारा 'कर्मसंन्यास' तिर ढल्काएकाले चित्त नबुझि 'कर्मयोग' तिर फर्काउनलाई भाष्यकारहरूका विरुद्ध कलम उठाएका हुन्। यो कुरा 'ईशतत्वम्' बाट छर्लङ्ग हुन्छ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऐतिहासिकसार

नेपाल विजेता रणभूमिमा वराहअवतारविष्णु समान गोर्खाका अधिपति श्री ५ बडामहाराज पृथ्वीनारायण शाह विहानका सूर्य समान पूर्वमा (कान्तिपुरमा) हुनु हुन्थ्यो ।

(१)

वहाँका सुपुत्र पापले रहित बालककालमा नै धेरै राजा रजौटालाई जितेर राज्य बढाउने ईश्वर भक्त नरश्रेष्ठ सिंह-प्रताप हुनु भयो ।

(२)

वहाँका सुपुत्र वीराग्रणी दाता, धनी सद्‌गुणले सम्पन्न वामदेव (महादेव) जस्ता वलिया रणबहादुर शाह हुनु भयो ।

(३)

वहाँका सुपुत्र शत्रु विजेता प्रतापि सद्‌गुण सम्पन्न दयालु आफ्ना पूर्वज भन्दा भिन्न प्रकृतिका गीर्वाणयुद्धवीरविक्रम शाह हुनु भयो ।

(४)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वहांका सुपुत्र विशुद्ध बुद्धिले युक्त प्रजावत्सल जसका प्रतापका अगाडि ठूला ठूला शत्रु पनि लत्रने यस्ता राजेन्द्रवीर विक्रम शाह हुनु भयो ।

यस्ता हिसावले लेखकले सानो भएतापनि चाख लाग्दो इतिहास जोडेको छ ।

टीकाको ऐतिहासिक महत्व

बौद्धधर्मको पतन भए पछि वैदिक धर्ममान्य संप्रदायहरुमा ऐले सवभन्दा पुरानो संप्रदाय आद्यशङ्कराचार्यको छ । शङ्कराचार्यले आफ्नो संप्रदायलाई वैदिक आधारमा चलेको हो भन्ने देखाउनका निमित्त प्रस्थानत्रयी ,उपनिषद्, ब्रह्मसूत्र र भगवद्गीता को भाष्य लेख्नु भयो छ । शङ्कराचार्यको भाष्यले ,कर्मसंन्यास' को बाटो लिएको छ र उपर्युक्त प्रस्थानत्रयीको भाष्य यस भन्दा पुराना पाइदैनन् । शङ्कराचार्यले 'अद्वैत' मतको प्रचार गर्नु भयो । वहांको जन्म समय संवत् ८४५ र गुहाप्रवेश संवत् ८७७ । त्यस पछिका प्रत्येक संप्रदायका प्रवर्तक आचार्यहरूले प्रस्थानत्रयीको भाष्य लेखे । प्रत्येक संप्रदायका आचार्यहरूले आफ्नो आफ्नो संप्रदायलाई पुरानो र प्रस्थानत्रयीका आधारमा खडाभएको हो भन्ने सिद्ध गर्दै आए । तर यी सबै भाष्यकारले खिचातानी गरी आफ्नो संप्रदाय सुहाउँदो लेखेतापनि आधारत शाङ्कर भाष्य नै हुन गएको छ ।

जस्तै रामानुजाचार्यले आफ्नो ,विशिष्टाद्वैत' मतको प्रचार गर्नु भयो । वहाँको जन्म संवत् १०७३ मा भएको हो । त्यस

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पछि'द्वैत' संप्रदायका प्रवर्तक मध्वाचार्यले पनि खिचातानि गरी आफ्नो संप्रदाय सुहाउँदो प्रस्थानत्रयीको भाष्य लेख्नु भयो । वहाँको समय सम्वत् १२५४ देखि १३३३ सम्म मानेको छ । त्यस पछि वल्लभाचार्यले 'शुद्धाद्वैत' मतको प्रचार गरे । यो रामानुज र माध्वसंप्रदायको समान वैष्णव मत हो । वहाँको समय संवत् १५३६ हो । यी उपर्युक्त आचार्यहरूका भाष्य सवै आफ्ना आफ्ना मार्गको पुष्टि गर्दै आखीरमा आद्यशङ्कराचार्यको कर्म संन्यास कै आधारशिलामा अडेका छन् भने पनि अत्युक्ति हवैन ।

यसपछि संवत् १९६७ मा आएर बालगंगाधर तिलकले पुराना भाष्यकारहरूले ग्रन्थको वास्तविक अर्थ नलिएर आफ्ना आफ्ना सम्प्रदाय सुहाउँदो अर्थगरी वास्तविक अर्थलाई छोड्दै गएका छन्, भन्दै शाङ्करभाष्यदेखि लिएर सवै भाष्यकारहरूको आलोचना गर्नु भएको छ । तिलकज्यूले पुराना आचार्यहरूले लिनु भएको कर्मसंन्यासको खण्डन गरी आफुले गीतारहस्य लेख्नु भएको छ ।

जस्तै—

उदाहरणार्थ– ईशावास्य उपनिषद् को लिजिए । यद्यपि यह उपनिषद् छोटा अर्थात् सिर्फ १७ मंत्रका ही है । तथापि इसकी योग्यता अन्य उपनिषदों की अपेक्षा अधिक समझी जाति है । क्यों कि यह उपनिषद् स्वयं वाजसनेयी संहिता में हि कहा गया है । यह समूचा ईशावास्योपनिषद् अथ से लेकर इति पर्यन्त ज्ञान-कर्म समुच्चयात्मक है× ।

× गीतारहस्य पृ. ३५९.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस पछि वहाँले लेख्नु भएको छ कि–

'इस से प्रकट होगा कि गीता उपनिषदों को पकडे ही नहीं है प्रत्युत ईशावास्योपनिषद् में स्पष्टतया वर्णित अर्थ ही गीतामें विस्तार सहित प्रतिपादित हुआ है। इस से ईशावास्यका और भगवद्गीता के कर्मयोग का जो सम्बन्ध हमने उपर दिखलाया है वही अधिक दृढ और निःसंशय सिद्ध होता है ❀।

बालगङ्गाधर तिलकले लेख्नु भएको छ आद्यशङ्कराचार्य पछिका आचार्यहरूले कर्मयोग पट्टि कसैले पनि दृष्टि दिएकाथिए नन्। यस तर्फ सर्वप्रथम दृष्टि मेरै परेको हो। यसभन्दा अघिका टीकाकार भाष्यकार सबैले प्रस्थानत्रयीलाई कर्मसंन्यास पट्टी मात्र ढालेका थिए।

'परन्तु टीकाओं पर हि निर्भर रहने से टीकाकारोंका दिया हुआ उत्तर समाधान कारक न भी जचें तो भी उसको छोड और दुसरा उत्तर सूझ ता ही नही है। इसि लिए हमने गीताकी समस्त टीकाओंको और भाष्यों को लपेट कर धर दिया, और केवल गीता के ही विचार पूर्वक अनेक पारायण किए। ऐसा करने पर टीकाकारोंके चङ्गुल से तो वचे और यह बोध हुआ की गीता निवृत्ति प्रधान नहीं है वह तो कर्म प्रधान है■।

यस पछि तिलकज्यू लेख्नु हुन्छ।

❀ गीतारहस्य पृ. ३६०.

■ गीतारहस्य पृ. १०.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'इस पुस्तक के पूर्वार्ध में जो गीतारहस्य नाम का निवन्ध है वह इस रीति से कर्मयोग विषयक एक छोटासा किन्तु स्वतन्त्र ग्रन्थ कहा जा सकता है⊠।'

'उपर दिए हुए प्रमाणों से अव स्पष्ट हो जायगा कि संहिता, ब्राह्मण, उपनिषद्, धर्मसूत्र, मनु, याज्ञवल्क्य, स्मृति, महाभारत, भगवद्गीता, योगवासिष्ठ और तत्वसारायण प्रभृति ग्रन्थों में जो निष्काम कर्मयोग प्रतिपादित है उस को श्रुतिस्मृति प्रतिपादित नमान के केवल संन्यास मार्ग को ही श्रुतिस्मृति प्रतिपादित कहना सर्वथा निर्मूल है★।'

उपर्युक्त बालगङ्गाधर तिलकले आद्यशङ्कराचार्य पछि निष्काम कर्मयोग पट्टि सर्वप्रथम दृष्टि मेरै पऱ्यो र यो ग्रन्थ लेखें भन्नु भएको छ। तर वहाँले गीतारहस्यको पाण्डुलिपि संवत् १९६७ मा तयार पार्नु भएको हो। त्यसभन्दा लगभग ८०-९० वर्ष पहिल्यै नेपाल देशीय विद्वान् धरणीधर पन्तले 'ईशतत्वम्' भन्ने ईशावास्योपनिषद्को टीका लेख्नु भएको छ। यस टीकामा आद्यशङ्कराचार्यको 'कर्मसंन्यास' को खण्डन गर्दै कर्मयोगको स्थापना गर्नुभएको छ।

जस्तै–

'भाष्यकारास्तु त्यक्तेन त्यागेनेत्यर्थः, ईश्वरात्म भावनया युक्तस्य पुत्राद्येषणात्रय संन्यास एव वाधिकारो न कर्म स्वित्याहुः।

⊠ गीतारहस्य पृ. १२.

★ गीतारहस्य पृ. ३६४.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तन्न मनोरममुत्तरर्च विरोधात् । तत्र यावदायुः कर्मानुष्ठानस्य विधेयत्वात्।'

त्यसपछि–

उभयो निःश्रेयस फलत्वे तुल्येऽपि कर्मयोगोऽति प्रशस्त इति तदर्थात् । त्याग शब्दस्य भावसाध्यत्वेऽपि फलत्याग एव व्याख्येयो न कर्मत्यागः।

त्यस्तै–

त्वयि नरे, अनीश्वरे जीवे, कर्मपुण्यपापरूपं न लिप्यते बन्धकं न भवति । अनेन कर्मयोगस्य भगवदभिमतं श्रैष्ठच-मुक्तम्।'

उपर्युक्त उद्धरण त केवल सूक्ष्म दिग्दर्शनका निमित्त मात्र हो । पुस्तक पाठक वर्गका हातमा नै हुनाले विशेष उद्धरण दिइ-रहनु अनावश्यक छ । अतः लग भग एक शताब्दि पूर्व स्वदेशीय विद्वान्द्वारा लेखिएको यो टीका प्रकाश गर्नाको कारण पनि यही हो कि आद्यशङ्कराचार्य पछिका कुनै भाष्यकारको पनि दृष्टि कर्मयोग पट्टि नगै कर्म संन्यासको मार्ग मात्र अँगालेका र धर-णीधरज्यूले नयाँ बाटो के भनू वास्तविक बाटो देखाउनु भएको हुनाले र यस मार्गका प्रथम पथ दर्शक भै कन पनि त्यसको श्रेय बालगङ्गाधर तिलकले लिएको हुनाले यो श्रेय पन्तज्यूले नै पाउनु पर्दछभन्ने तथ्य प्रमाणित गर्नका निमित्त यो टीका प्रकाश गरेकोहो

–सम्पादक

ईशतत्त्वम् पृ. ३३.
ईशतत्त्वम् पृ. ३४.
ईशतत्त्वम् पृ. ४१.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ईशतत्त्वम्

श्रवणमननित्यध्यानसंवीक्षणीय-
म्भवतरणनिदानं स्वात्मबोधोपकारि ।
सगुणमगुणमात्मज्योतिरानन्दपूर्णं
परमपरमनेकञ्चैकमैशम्महोऽव्यात् ।।१।।

श्रीपृथ्वीनारायणसाहः सङ्ग्रामाङ्ग्रणवीरवराहः ।
गोर्खाधीशो जितनेपालः प्राच्यामासीद्रविरिव बालः।।२।।
तस्मादासीदुज्झितपापः श्रीनरसिंहः सिंहप्रतापः ।
बालत्वेऽपि सर्मजितराज्यः श्रीशध्यानजितस्वाराज्यः।।३।।
तस्यात्मजो रणवहादुरसाहदेवः प्रादुर्बभूव बलवानिव
वामदेवः ।
तस्याग्रतः प्रतिभटो न बभूव कश्चि द्दाता धनी प्रियगुणः
सुभगो विपश्चित् ।।४।।
तीर्वाणयुद्धोऽथ बभूव तस्मादभूतपूर्वो नृपतिर्न तस्मात् ।
धन्यः प्रतापी विजितारिवर्गः कीर्तन्यतीर्थःकृपयाप्तभर्गः
।।५।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्पुत्रः श्रीराजराजेन्द्रसाहः प्राभूदुद्यच्छुद्धबुद्धिप्रवाहः ।
नासन् क्लेशा लेशतो वि (पि) प्रजानान्न प्रावेशो यस्य
वैरिव्रजानाम् ।।६।।

स्वप्ने निरीक्ष्य नरवाहनतामुपेतं श्रीरङ्गनाथबुधसेवित-
सव्यपार्श्वम् ।
तम्भीमसिंहमुखमन्त्रिवरैः परीतं गुह्येश्वरीनिकटकल्प-
तरोरधस्तात् ।।७।।

पृच्छन्तमर्थमुरुधा विविधश्रुतीनां
सिद्धान्ततत्वविदुपासितपादरेणून् ।
विद्वत्तमानथ सदर्थरुचिम्प्रसन्न-
वक्त्रारविन्दमुपलभ्य मुदङ्गतोस्मि ।।८।।

ईशावास्यव्याख्यया तोषितो मे किञ्चित् प्रादात्तद्गृ
हीत्वा प्रबुद्धः
तत्संतोषायेशतत्त्वं गुरूक्तीः स्मारं स्मारं वच्मि सा
श्रुतीनाम् ।।९।

श्रीमत्प्रेमनिधिद्विजानुजगुणज्येष्ठोऽभवत्पण्डितो-
वादे चित्रधरार्चितः★सुधीर्हरिनिधिस्तस्माच्चरेवाधरः
तत्पुत्रो धरणीधरः कृतमतिर्वक्ता निबन्धाध्वरे
राजासौ क्रतुजन्यकीर्तिफलभाग्भूरिस्वभूर्दक्षिणा ।।१०

★ अत्र छन्दसि सुधी इत्यक्षरद्वयमधिकं प्रतिभाति
यतोऽस्य निष्काशने सुपाठमिदं शार्दूलविक्रीडितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ तावदीश्वरप्रसाद एव पुरुषार्थहेतुरिति सिद्धान्तः । तदर्थमीश्वराराधने यतितव्यमितियुक्तम् ।

अत एवः—

स्वर्गापवर्गयोर्मार्गं मामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरुप्यते ।।

इत्यत्रोपासनाया मुक्तिमार्गत्वमुक्तम् । तेनोपास्तेर्न-साक्षाद्हेतुत्वम् । किन्तु परमात्मप्रसादमुत्पाद्येति सूचितम् । तत्त्वज्ञानस्य तूपासनायामेवोपयोगोऽत एव "नान्यः पन्था" इति श्रुतिर्मार्गान्तरप्रतिषेधेन ज्ञानस्य मार्गत्वमेव द्रढयति तस्माद्भगवत्प्रसाद एव मुक्तिकारणम् ।

तथा च श्रुतिः—

नायमात्माप्रवचनेनलभ्यो नमेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वामिति ।।

अनेन भगवत्प्रसादानास्पदस्य पुरुषार्थभागित्वन्नेत्युक्तम् । ज्ञानयोगोऽपीश्वरप्रसादमन्तरेण दुर्लभः—

तेषां सततयुक्तानाम्भजताम्प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।।

इति भगवद्वचनेन ज्ञानस्येश्वराधीनत्वावगमात् ।

भक्त्या त्वनन्ययाशक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुञ्च तत्वेन प्रवेष्टुञ्च परन्तप ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति स्मृतेर्ज्ञानिदर्शनप्रवेशानां भक्तिमात्रसाध्यत्वबोधनाच्च । अत्र ज्ञानपूर्वकमाराधनं भक्तिपदार्थो नत्वाराधनत्वप्रकारकं ज्ञानम्, धातोः सेवावृत्तित्वात् ।

भजनम्भक्तिरितिव्युत्पत्तेःसर्वेन्द्रिय व्यापाराणामीश्वरे समर्पण मिति यावत् । अतः एव 'श्रवणं कीर्तनं विष्णो' रित्यादिना नवधेश्वरविषयव्यापाराभिधानम् । यस्त्वेतस्मात्प्रकर्षो जन्यते सोऽपिः—

क्वचिद्धसन्त्यच्युतचिन्तया क्वचिद्रुदन्ति नन्दन्ति वदन्त्यलौकिकाः।

इत्यादि स्मृतिप्रदर्शितव्यापारानुमेयो विलक्षणो भाव एव न तु ज्ञानमात्रम् ।

मत्प्रसादात्परां शान्ति स्थानं प्राप्नोति शाश्वतम् ।

इत्युपसंहारेण भगवत्प्रसादस्यैवापवर्गहेतुत्वावधारणाच्च तथा चेश्वरप्रसादमन्तरेण न पुरुषार्थलाभो, नोपासनमन्तरेणेश्वरप्रसादो, न ज्ञानमन्तरेणोपासनं, न चित्तशुद्धि विनाज्ञानं, न पापक्षयंविना चित्तशुद्धि र्न विनाधर्मानुष्ठ नं पापक्षयो, न मन्त्रानन्तरेणधर्मानुष्ठानमिति । तद्विनियोगा मन्त्रा उनचत्वारिंशताऽध्यायैरुपदिष्टाः । अथ चत्वारिंशत्तमेऽध्याये "ईशावास्य" मित्यादि सप्तदशर्चमुपदिश्यते । तस्य तु कर्मसुविनियोगानर्हत्वात्परमरुषार्थोपायप्रतिपादनपरत्वं युक्तम् । यथाहुर्भगत्पादाः—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"तेषामकर्मशेषस्यात्मनो याथात्म्यप्रकाशकत्वात्" इति । यस्तु मुक्तितत्वज्ञानयोः कार्यकारणाभावः सर्वतन्त्रसिद्धान्ततयोपलभ्यते, सतु नोपपद्यते । मिथ्याज्ञाननाश❀त्वस्यैव तत्वज्ञान कार्यतावच्छेदकत्वात् । न चैतावतैव परिसमाप्तम्, दोष निवृत्यादेरवश्यापेक्षणात्, तथा च पारमर्ष सूत्रम् "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदन्तराभावादपवर्ग इति"

अयमर्थः– दुःखादीनामुत्तरमुत्तरं पूर्वस्य पूर्वस्य कारणम्, कारणनाशे च कार्यनाश क्रमेणापवर्ग इति एवं तर्हि तत्त्वज्ञानान्निःश्रेयसाधिगम इति, कथमुक्तमिति चेन्नापरस्यापवर्गस्य जीवन्मुक्तिपदेन प्रसिद्धस्य तत्त्वज्ञानकार्यत्वाभिधानात् , काशीमरणादिजन्यमुक्तौ तत्त्वज्ञान व्यभिचारश्च । तेषाम्प्रयोजकत्व वर्णनमपि गौरवग्रस्तम् । भगवत्प्रसादे तु ज्ञानादिकमुपयुज्यते, क्वचित्तु भगवदिच्छैव, अत एव स्त्रीशूद्रादीनामपि मुक्तिरुपन्नेति । इत्थञ्च "धर्मेण पापमपनुदतीतिश्रुते" धर्मानुष्ठानात्पापक्षयेसति चित्तशुद्धौ विविदिषा योगाज्ज्ञानोत्पत्तौ भगवदुपासने सति तत्प्रसादात्परमपुरुषार्थ इति धर्म एव मूलम् ।

तदुक्तं गरुडपुराणे–

धर्मात्सञ्जायते ह्यर्थो धर्मात्कामोऽभिजायते ।
धर्मादेव हि मोक्षश्च तस्माद्धर्मं समाचरे दिति ।।

❀ मिथ्याज्ञाननाशस्यैवेति भवितव्यम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र मोक्षहेतुज्ञानस्यापि धर्मपरार्थत्वान्नज्ञानश्रुतिविरोधः,–

अयन्तु परमोधर्मो यद्योगेनात्मदर्शनम् ।

इति योगीश्वरवचनेन तथा बोधनात्, योऽपि हि धर्मः कर्मात्मकस्तस्यापि न मोक्षोपायत्वानुपपत्तिः सर्वकर्मणामीश्वरेऽर्पणीयत्वोपदेशात् ।

तदुक्तम्भगवता–

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसिकौन्तेय तत्कुरुष्व मदर्पणमिति ।।

भागवतेऽपिः–

कायेनवाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वाऽनुसृतस्वभावात्
करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तदिति ।।
'अशक्तो ह्याचरन् कर्म परमाप्नोति पूरुषम् ।'

इत्यादिना कर्मसामान्यस्य भगवत्प्राप्त्युपायत्वावगम्याच्च । वस्तुतो भगवत्य★र्पणीयत्वमेव सर्वकर्मणाम्, स्वर्ग पुत्राद्यर्थश्रुतिस्त्वन्यार्थानिगूढार्थत्वाद्वेदानाम् ।

तदुक्तं भागवते–

परोक्षवादो वेदोऽयं बालानामनुशासनम् ।
कर्ममोक्षाय कर्माणि विधत्तेह्यगदं यथा इति ।।

★ 'भगवदर्पणीयत्वमेव' इति साधुः स्यात

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किञ्च–

किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ।
इत्यस्या ✍हृदयँल्लोके नान्यो मद्वेद कश्चन ।।

इत्यनेन भगवद्भिन्नस्य वेदार्थानभिज्ञत्वन्निश्चीयते "वेदान्तकृद्वेद विदेवचाह" मित्यादिना भगवत एव वेदकर्तृत्वं वेदवित्त्वन्तु तत्कर्तृत्वान्यथा नुपपत्तिसिद्धमपि स्वान्यस्य प्रतिषेधार्थमुक्तम् । अनेन "कर्तु स्मरणा" दिति सांख्यमतं निरस्तम् । तन्मते वेदस्य जन्यत्वस्वीकारादकर्तृकत्वे स्वमतव्याघातात् । न्यायविद्भिर्वाक्यत्वेन पौरुषेयत्वसाधनाच्च, अतएव वेदनित्यत्ववादि वेदान्तिमतमपि परास्तम् । "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवे" त्यादिश्रुतिर्जातिनित्यत्वेन प्रवाहनित्यत्वाभिप्राया । अत एव न्यायभाष्यम्–

"मन्वन्तर युगान्तरेषु चातीतानागतेषु सम्प्रदायाभ्यासप्रयोगाविच्छेदो वेदानां नित्यत्वमाप्तप्रामाण्याच्च प्रामाण्यमिति" । नन्वशरीरस्य परमात्मनः पुरुषत्वसमानाधिकरणं कथमाप्तत्वन्तत्वे वा कथमशरीरत्वमिति चेन्न, सर्व शरीरत्वात्परमात्मनोऽत एव यस्य पृथिवी शरीरमित्यादिकं श्रूयते । अशरीरश्रुतिस्तु योनिजादिशरीरप्रतिषेधा× ऽ तः पुरुषत्वं सिद्धम् । अत एव "क्लेशकर्म विपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर" इति पातञ्जलं सूत्रम् । "गुणविशिष्टमात्मान्तरमीश्वर" इति न्याय-

---

✍ प्रयोगोऽयं चिन्तनीयः ।
× 'शरीरप्रतिषेधपरा' इति साधुः स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भाष्यञ्च समञ्जसम् । वस्तु तस्तु नित्यमेव तस्य शरीरं इच्छामयत्वात्, तदिच्छायाश्च नित्यत्वात् । "नाभ्या आसीदन्तरिक्षम्" "अस्य वा महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः" इत्यादि श्रुतेस्तच्छरीरस्यानुमितत्वात् ।

अत एवोक्तं वाराहपुराणे–

सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः ।
हानोपादानरहिता नैव प्रकृतिजाः क्वचि दिति ।।

तथा च व्याससूत्रम्–

लोकवत्तु लीला कैवल्य मिति ।

अयमर्थः – इच्छाशरीरेण विचित्रो विनोदो लीलापदार्थस्तया कैवल्यमसाधारण्यं लोकवदेव । यथा लोकः स्वस्व विलक्षणव्यापारेणासाधारणस्तथेश्वरोऽपीति ।

भगवताप्युक्तम्–

अव जानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परम्भावमजानन्तो मम भूतमहेश्वरमिति ।।

अयमर्थः – इच्छया नराकारत्वमापन्नं मां ये ऽवजानन्ति ते मूढा एव, तत्र हेतुः – परम्भावमजानन्त इति, अयमेव हि परोभावो यदप्राकृतनित्यशरीरत्वम्, तद्विशिनष्टि भूतमहेश्वरमिति, सर्वजीवनियामकमित्यर्थः ।

अत एव महाभारते–

माया ह्येषा मया सृष्टा यन्मां पश्यसि नारदेति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र नराकारं मां पश्यतु लोकः, इतीच्छैव मायापदार्थ-स्तस्या नित्यत्वऽपि जीवादृष्टसहकारेण प्रवृत्तेः सृष्टेत्युक्तम्, तस्मान्नित्यविग्रहवानीश्वर इति सिद्धम् । ईदृशेश्वर वरणीयेना-वश्यमेव भाव्यम् । प्रियो हि वरणीयो भवति, य श्चोपास्ते स प्रिय इत्यनुभवसिद्धम् । चतुर्विधाः खलु पुरुषा उपासते ।

चतुर्विधा भजन्ते मां पुरुषाः पुरुषर्षभ ।

आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभइतिभगवदुक्तेन ।

अत्र ज्ञानिपदेनोत्पन्नतत्त्वसाक्षात्कार उच्यते, इतरस्य जिज्ञासुत्वोपपत्तेरिति द्रष्टव्यम् । अत एवोपासनं विधीयते । आत्मानमुपासीत, आत्मानं लोकायोपासीत, अयमात्मा ब्रह्मेति, कथमसाक्षात्कृतमुपासीतेति साक्षात्कारविधिरप्यात्मा वा अरे द्रष्टव्यः, श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति । श्रवणा-द्युपायकोऽभिधीयते तत्र साक्षात्करणीयस्यात्मनो यथावस्थित-स्वरूपनिर्द्धारणाय सप्तदशर्चन्तत्रेदमाद्यर्चम्:–

ईशावास्यमिद ँ सर्वं यत्किञ्च जगत्याञ्जगत् ।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ।।१।।

व्याख्या– ईष्ट इतीट् ऐश्वर्य विशिष्टम्, धातो रैश्वर्य वृत्तित्वात्, कर्तृ क्विवन्त ञ्चैतत्, अस्यैव ब्रह्मपदार्थत्वं, खं ब्रह्मेत्युपसंहारदर्शनात्, सपर्यगाच्छुक्रमित्यादिना मध्येऽपि तस्य विशेषितत्वात्, अत एव सूत्रं गति सामान्याच्चेति, गतिरवगमः पदार्थप्रत्यय स्तस्य सामान्यं सर्ववेदान्तेषु तुल्यत्वमेवेति तदर्थः । तथा च यथाऽत्रैश्वर्यविशिष्टं ब्रह्म प्रतिपिपाद पिषितं, तथैवान्य-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रापीति द्रष्टव्यम्, यद्वा लोकवेदयोः पदार्थप्रत्यय स्तुल्य एव, प्रतियन्ति च लौकिका ईश्वरमेव ब्रह्मपदार्थं नतु तद्व्यतिरिक्तं तस्माद्वेदेऽपीश्वरपदार्थो ब्रह्म, न तद्व्यतिरिक्ते प्रमाणमस्ति । निर्विशेषे ब्रह्मणि प्रमाणोपन्यासस्याशक्यत्वात्, सर्वं प्रमाणानां सविशेषविषयत्वात्, यस्तु स्वप्रकाशं स्वानुभवसिद्धं ब्रह्मेति समयः, सोप्यात्मसाक्षिकसविशेषानुभवनिरस्तः । शब्दोऽपि हि न निर्विशेषार्थप्रतिपादनसमर्थः । प्रकृतिप्रत्ययोरर्थभेद प्रवृत्तयोर्नियतयोगिन : पदस्य विशिष्टार्थप्रतिपादकताया अवर्जनीयत्वात् । पदसमुदायरूपस्यवाक्यस्यापि भिन्नपदार्थसंसर्गविशेषाभिधायित्वेन निर्विशेषेऽसामर्थ्यात् । प्रत्यक्षमपि सविकल्पकं न निर्विशेषग्रहणसमर्थम् । तस्य सविशेषविषयतायाः सर्वसिद्धत्वात् । निर्विकल्पकमपि विशिष्टस्यैव विशेषाग्रहणे, सर्वविशेषरहितस्य कदाचिदपि ग्रहणादर्शनात् । एवमनुमानमपि प्रत्यक्षादि दृष्टसंबन्धविशिष्टविषयत्वात्सविशेषविषयमेव । स्वभावविशेषविशिष्टमेव, तावद्वस्तु निर्विशेषं वदन्तो जननीवन्ध्यात्वप्रतिज्ञायामिव स्ववाग्विरोधः स्पष्ट एव । निर्विशेषवादे तु व्याख्यास्यमानोपनिषत्पदवाक्यार्थासङ्गतिरेव । ऐश्वर्यं विशिष्टस्यैवेट्पदार्थताया वक्तव्यत्वात्, निरवच्छिन्नस्यापदार्थत्वेन खपुष्पतुल्यत्वात् । ऐश्वर्यञ्च ज्ञानक्रियाशक्तिमत्वरूपम् । निर्विशेषस्य त्वशब्दत्वादीक्षतेर्ना शब्दमिति प्रतिषेधः स्यात् । यद्यपि साङ्ख्यपरिकल्पितप्रधानप्रतिषेधपरंसूत्रं, तथापि निर्विशेषत्वेन ऽशब्दत्वापत्तौ ब्रह्मप्रतिषेधपरताया अपि सुवचत्वात् । तस्मान्निर्विशेष वादो निर्युक्तिक एव । तथा चेदृशेनेशावास्यमाच्छाद-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नीयम्, इदमनुभूयमानं सर्वम् अनेकमशेष ञ्च स्वत्वेन स्वीकर्तव्यमित्यर्थः।यद्वाईशशब्देन षष्ठ्यन्तेनतृतीयान्तेन वा समस्तमेतद् कृत्यानां कर्तरिवेतिस्मरणा त्तेनेशेनेशस्य वा आवास्यमाच्छादनीयं व्याप्यमिति यावत् । समासेन व्याप्यव्यापकयोर्नित्ययोगरूपं सामर्थ्यं तदुभयस्य सत्यत्वञ्च सूचितम् । अस्यैवानेजदेकमित्यादिना विशेषस्य वक्ष्यमाणत्वादयमेव ब्रह्मपदार्थो बृहतीति व्युत्पत्तेर्निरतिशय तत्तद्धर्म वैशिष्टचरूपवृद्धेर्धातुवाच्यत्वात्, नत्वीश्वरातिरिक्तं, तत्र प्रमाणविरहस्योक्तत्वात् । सर्वानतिरिक्त वादोप्यनेन निरसनीयोऽन्यथाच्छाद्यच्छादकनिर्देशाऽसङ्गतेः । यद्यपि सदेव सोम्येदमग्र आसीदित्यादावात्मान्यविषयकज्ञानरूपसाक्षात्कारवताचार्येणात्मैवेदमनिर्दिष्टस्तथाप्यात्माशरीरत्वेनाभिमतस्य नित्यपृथिव्यादेरेव स निर्देशः आत्मस्वरूपतो निर्देशानर्हत्वात् । अनिर्देश्यश्रुतिविरोधात्, शरीरशरीरिणोरभेदोपचारत्वात्मनिर्देश इत्युच्यते । एवमेव हि चैत्रमैत्रदेवदत्तादि शब्दै स्तत्तच्छरीरावच्छिन्न । आत्मानोनिर्दिश्यन्तेऽयञ्चैत्रोऽयं मैत्र इति । न चैतावताऽतात्विकमद्वैतम् । न हि नित्य पृथिव्यादिकं नास्तीति साम्प्रतं परमाणु सद्भावात् । अणवो ये दशार्द्धानामित्यादिमनुवाक्ये द्वयणुकानामेवानित्यत्वमुक्तम् । परमशब्दानुल्लेखात् । द्वयणुकान्यथानुपपत्त्या तत्सिद्धेः । ब्रह्मणएवोपादानत्वे जडत्वापत्तिः । घटकपालादि द्वयणुकान्तानामुपादानं जडं तदुपादानन्तु चेतनमित्यस्याशक्यवचनत्वात् । प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुरोधादितिसूत्रेप्यपादानाविष्टकारणत्वं प्रकृतित्वमभिप्रेतम् । नतूपादानत्वमात्रमुक्तदोषात् । तथा चानामरूपस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जीवस्यानात्मभूततत्तच्छरीरावच्छिन्नस्य यथा देवदत्तादि शब्दाभिधेयता, एवमुपादानाविष्टत्वेनपरमात्मनः प्रकृतिशब्दाभिधेयता । शरीरशरीरिणोरभेदोपचारस्योभयत्र तुल्यत्वात् । तथा चोपादानाविष्टत्वेनात्मनिज्ञाते उपादानस्यापि ज्ञाततया तद्विकारज्ञानं सुतरामेवेति न प्रतिज्ञादृष्टान्तयोरुपरोधः । अथवा द्वयणुकादिकार्यन्यथानुपपत्या विकार्यतया परमाणूपा-दन ○ इत्युपादनं ब्रह्मवाहुलकात्कर्तरि ल्युः। नहि चेतन निरपेक्षस्योपादानस्य कारणत्वं युज्यते, सर्वदा कार्योत्पादप्रसङ्गात् । तथा च तस्यैव प्रकृतित्वम् । अदृष्टसहकारिणस्तु चेतनस्य कारणत्वान्नास्माकमुक्ताऽऽपत्तिः । यतो वा "इमानि भूतानि जायन्त" इत्यत्रापि यच्छब्देनापादानशरीरं ब्रह्मोच्यते । अत एव तस्यापादानसंज्ञा जनिकर्तुः प्रकृतिरिति पाणिनिस्मरणात् । अत एव ब्रह्मणः प्रजाःप्रजायन्त इत्युदाहरन्ति, यत्किञ्चिदिति, यदपि दिग्देशकालाकाशादिकमपरिच्छिन्नत्वेनाभिमतं तदपीश्वरेणाच्छादनीयम् । नहि तेषामनन्तत्वहानिः समव्याप्तानामनतिरेकात् । नापीश्वरस्याकाशाद्यन्तानभिज्ञत्वेनासार्वज्ञम् । परिच्छिन्नसर्वज्ञतायाएवेष्टत्वात् । "जगत्या"-मिति पृथिव्यामिति भाष्यकाराः जगदिति गतिमदित्यर्थः परिछिन्नमिति यावत् । तथा च चिज्जडम्परिच्छन्नापरिछिन्नं दृश्या दृश्यं सर्वमीश्वरस्यैव स्वंभवति न कस्यचित् कुत्रचित्स्वत्वमस्तीति पर्यवसितार्थः, एतेन जडत्वादिभिर्ब्रह्मोत्तरस्य मिथ्यात्वसाधनेपरेषाम्परास्तम् । ईश्वरस्य स्वंमिथ्येत्यस्य सहृदय-

---

○ उपादत्त इति साधुः स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विचारानर्हत्वादित्युपरिष्टात्प्रवेदयिष्यते । इदानीं विधेयांश-मुपदिशति । "तेन त्यक्तेन भुञ्जीथा" इति तेनेश्वरेण त्यक्तेन अनुग्रहदत्तेन ईश्वरप्रसादलब्धेनेति यावत् । अनेनेश्वरप्रसादस्य प्रार्थनीयत्वमुक्तम् । भुञ्जीथाः, भोगं प्रार्थय भोगोऽत्र सर्वज्ञत्वा नन्दमयत्वादिरूपेश्वरगुणविषयोऽनुभवः "सोऽश्नुते सर्वान्का-मान्सह ब्रह्मणा विपश्चितेति" श्रुतेः काम्यन्त इति कामा ईश्वर-धर्मा एव नतु स्वर्गपुत्रादयस्तुच्छत्वात्, ब्रह्मणा सह तद्भोगानु-पपत्तेश्चेति । यद्वा तेन निमित्तेन त्यक्त्येनार्पितेन ईश्वरार्पितेन कर्मणेति तदर्थः सर्वकर्मणामीश्वरेऽर्पणं कुर्वित्युपदेशः ईश्वरा-र्पितकर्मणां बन्धकत्वानुपपत्तेः तदुक्तम् –)

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धन इति ।

यज्ञोऽत्र विष्णुः 'यज्ञोवै विष्णुरिति श्रुतेः । 'भाष्यकारास्तु त्यक्तेन त्यागेनेत्यर्थः, ईश्वरात्मभावनया युक्तस्य पुत्राद्येषणा-त्रयसंन्यास एव वाधिकारो न कर्म स्वित्याहुः तन्न मनोरसमुत्तर-र्चविरोधात् । तत्र यावदायुःकर्मानुष्ठानस्य विधेयत्वात् । त्याग शब्देनापि कर्मसामान्यत्याग एव परेषामभिप्रेतोऽस्माकं तु कर्म-फलत्याग एव ।

यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयत इत्युक्तेः ।

न कर्मणा न प्रजया धनेन त्यागेनैकेनामृतत्वमानशुः

इति वाक्येऽपि फलत्याग एव विवक्षितः न कर्मणेत्यपि सकाम-कर्मपरम्, ईश्वरार्पितकर्मणामबन्धकत्वेन त्यागानर्हत्वात् ।

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।

तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति भगवद्वचनात् । उभयोर्निःश्रेयसफलत्वे तुल्येऽपि कर्मयोगोऽति प्रशस्त इति तदर्थात् । 'त्यक्त' शब्दस्य भावसाधनत्वेऽपि फलत्याग एव व्याख्येयो न कर्मत्यागः । भुञ्जीथा इत्यस्य पालयेथा इति व्याख्यानमपि तेषामयुक्तम् । भुजो नवन इति आत्मनेपदपर्युदासकपाणिनिस्मृतिविरोधात्, छान्दसकत्व कल्पनमपि सत्याङ्गतावयुक्तम् । "मागृधः कस्य स्विद्धनम्" इति कस्यस्विद्धनम्मागृधः इति योजना कस्य स्वित् ईश्वरस्य तदनुग्रह दत्तस्यान्यस्य वा धनम्पशुस्त्रीपुत्रहिरण्यान्नादिरूपम्, मागृधः मा काङ्क्षीरित्यर्थः । स्विदित्यनर्थको निपात इति भाष्यकाराः, यद्गृध्येतात्मैव सर्वमितीश्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वमतो मिथ्याभिषयां गृधिम्माकार्षीरित्यपि भाष्यकृतः, अत्र सर्वस्यात्मत्वे तत्कथम्मिथ्येत्युच्यते । आत्मत्वेन सत्यताया एवौचित्यात् । असत्यत्वे त्वात्माप्यसत्यः प्रसज्यत इति न किञ्चिदेतत् । अभेदोऽपि न श्रौतः व्याप्य व्यापक भावस्य भेदाधिष्ठानत्वात् । भेदस्यैव श्रौतत्वलाभात् । सर्वमिथ्यात्वन्त्वग्रे निराकरिष्यते । एनमेवार्थं स्पष्टयति द्वितीयमन्त्रेण ।।

कुर्वन्नेवेह कर्माणि जिजीविषेच्छत ँ समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।२।।

व्याख्या– यज्ञार्थत्वेनायङ्कर्मणां नियमः न कर्मलिप्यत इत्यनेन तादृशकर्मणामेवाभिप्रेयमाणत्वात् । ईदृश व्याख्यानस्य–

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति भगवतैव स्पष्टीकृतत्वात् । "अत एव नियमात्" इति व्यास सूत्रे तत्वज्ञानस्य कर्मशेषत्वमुक्तम् । "यद्यपि नाविशेषात्" इति सूत्रे । न कर्मशेषत्वं ज्ञानस्य । विद्वानित्याविशेषस्या न भिधानात् । अविद्वद्विषयएवायङ्कर्मनियम इति निर्धारितं तथापि यदि प्रकरणादिवसेन❀विद्वानपित्यवधार्येत तदा कर्मशेषत्वं ज्ञान-दुरपन्हवम् सङ्कोचे मानाभावाच्च । यद्यपि 'स्तुतयेऽनुमतिर्वे-ति' सूत्रेण न कर्म लिप्यत इत्युत्तरार्द्धर्चपर्यालोचनया ज्ञानस्तुत्य-र्थङ्कमानुमतिरियम्, कर्माणि कुर्वत्यपि ज्ञानिनि कर्मलोपो न भवति ज्ञान प्रभावादिति कर्म शेषत्वं ज्ञानस्य वार्यते तथापि यदि परिव्राजकस्यात्र संबन्धो नास्ति कर्मानधिकाराश्रयणात्तदैव कर्म शेषत्वन्न ज्ञानस्येति युक्तम् । अस्मिन्मते लक्षणैव दोषः, अथ माभूच्छ्रुति सङ्कोच इति चातुराश्रम्यमत्र संबद्ध्यते तदा ज्ञानस्य कर्मशषत्वेऽपि न दोषः । विधीयते हि कर्मस्वधिकारो यतीनाम् ।

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतञ्जलं पिबेत् ।
सत्यपूतां वदेद्वाचं मनः पूतं समाचरेदिति ।।

परिव्राजकम्प्रकृत्य मनूक्तेः ।

किञ्च–

चतुर्भिरपि चैवैतैर्नित्यमाश्रमवर्तिभिः ।
दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ।.
धृतिः क्षमादमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणमिति ।।

❀ अत्र 'वशेन' इति भवितव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनुवचनैक वाक्यत्वाद्यतीनामप्यत्र संम्बन्धोवगम्यते ।

अह्ना रात्र्या च याञ्जन्तून् हिनस्त्यज्ञानतो यतिः ।
तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् षडाचरेत् ।।
प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्विषान् ।
प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ।।

इति च मानवं वचनं न निर्विषयमापद्यते कर्मानधिकारपक्षे ।

किञ्चः-

अधि यज्ञं ब्रह्मजपेदाधिदैविकमेव च ।
आध्यात्मिकञ्च सततं वेदान्ताभिहितञ्च यत् इति स्मृतेः।

समस्त वेदजपो यतीनामनुज्ञायते । यज्ञमधिकृत्य प्रवृत्तन्देवतामधिकृत्य प्रवृत्तं जीवमधिकृत्य प्रवृत्तं वेदान्ताभिहितं परमात्मप्रतिपादकञ्च वेदञ्जपेदिति तदर्थात् ।

तत्कथन्नाविधेष्वे❀षु कर्मष्वधिकृतः परिव्राजको नात्र संबद्ध्येत् । नह्यग्नि होत्रत्यागमात्रेण लिङ्गान्तरग्रहणमात्रेण वा स्वस्थात्मा यति स्तिष्ठति तिष्ठन्वा न प्रत्यवैतीति युज्यते ।

दूषितोऽपि चरेद्धर्मं यत्र कुत्राश्रमेरतः ।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ।।

इति मनूक्तेः,न हि गृहस्थादीनामपि सर्वाणि कर्माणि नियम्यन्तेऽसंभवात्, किन्तु स्वाश्रमविहितान्येवातः परिव्राजकस्यापि स्वाश्रमविहितान्येव नियम्यन्त इति कर्मशेषत्वं विद्याया नानुप-

❀ 'न्नाविधिषु' इति युक्तं स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पन्नम् । यानि तु स्वर्गादिफलानि कर्माणि तच्छेषत्वं ज्ञानस्य प्रत्युच्यते "स्तुतये ऽनुमतिर्वेति" अत एव शमदमाद्युपेतः स्यादित्यग्रिमसूत्रम् । यत्तु "अधिकोपदेशात्तु वादरायणस्यैवं तद्दर्शनात् " इति सूत्रम् । तस्याप्ययमर्थः, ब्रह्मसंस्थोऽमृतत्वमेतीत्यभिधायाधिकमुपदिश्यते । एनमेव प्रव्राजिनोलोकमिच्छन्तः प्रव्रजन्तीति तज्ज्ञपयन्ति ब्रह्म संस्थाया अनुष्ठेयत्वमिति यद्वादरायणस्य मतं तत्तथैवेति । यत्तु व्याचरव्युभाष्यकाराः, यदि संसार्येवात्माशारीरः कर्ता भोक्ता च शरीरमात्रव्यतिरेकेण वेदान्तेषूपदिष्टः स्यात्स्यात्ततो वर्णितेन प्रकारेण फलश्रुतेरर्थवादत्वमधिकस्तु शारीरादात्मनो ऽसंसारीश्वरः कर्तृत्वादिसंसारधर्मरहितो ऽपहतपाप्मत्वाविशेषणः, परमात्मा वेद्यत्वेनोपदिश्यते वेदान्तेषु । न च तद्विज्ञानङ्कर्मणाम्प्रवर्तकं भवति । प्रत्युत तत्कर्माण्युच्छिनत्तीतिवक्ष्यत्यूपमदञ्चेत्यत्र । तस्मात्पुरुषार्थोऽतः शब्दादिति यन्मतम्भगवतो वादरायणस्य तत्तथैव तिष्ठति न शेषत्व प्रभृतिभिर्हेत्वाभासैश्चालयितुं शक्यते तथा हीत्यादि । अत्रेदं वक्तव्यम्, किं तज्ज्ञानं सामान्यतो न कर्मसुप्रवर्तकं विशेषतो वा । आद्ये शमदमादिष्वपि न प्रवर्तयेत् । द्वितीये तु विशेषोवक्तव्यः,ज्ञानविरोधो विशेष इति चेज्ज्ञानाविरोधिषुप्रवर्तकमेव । तथा चाग्निहोत्रादिकमपि यदेश्वरार्पणबुद्ध्यानुष्ठीयते । न तदा किञ्चिद्विरोधं ज्ञानस्य पश्यामः, उपमर्द वचनं तु ज्ञानशेषीभूतानामेव कर्मणामुपपन्नमिति । एवं तर्हि पुरुषार्थोऽतः शब्दादित्यसङ्गतम्परिव्राजकाधिकारात् । न च तत्र सर्वाधिकारोऽविशेषादिति साम्प्रतम् । कुर्वन्नेवेति श्रौतस्य नियम-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्योपरोधात् । यत्तूक्तं ज्ञानस्तुतये कर्मानुमतिरिति । तन्न, ईश्वरप्रसादस्तुतये कर्मानुमतिरित्यस्य वाच्यत्वात् । वर्णितमेतत्तेनत्यक्तेनेत्यस्य तत्प्रसाद लब्धेनेत्यर्थ इति प्रागेव । नत्वेतदयुक्तम् कर्मणः क्षीय◇फलत्वात् ।

तथा च श्रुतिः–

'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्य चितोलोकः क्षीयत इति' । साङ्ख्या अप्यूचुः–

दृष्टवदानुश्रविकः सह्यविशुद्धिक्षयातिशययुक्तः । इति ।

स्मृतिरपि––

क्षीणेपुण्ये मर्त्यलोकं विशन्तीति ।

तत्कथं ज्ञानस्य कर्मशेषत्वं । मैवम्

'अपामसोमममृता अभूम–अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीति श्रुतेः ,। कर्मफलस्याक्षय्यत्वप्रतिपादनात् । एवं स्वर्गकाम इत्यादावपि न दिव्यलोकः स्वर्गशब्देनोच्यते । किन्तु

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतञ्च तत्सुखं स्वः पदास्पद इति ।।

इति श्रुतेर्दुःखासं भिन्नसुखं ब्रह्मानन्दएवोच्यते ।

'चोक्तम् ननु पुण्यचितो लोकः क्षीयत इति' । सत्यमुक्तम् । इदमप्युक्तम्:–अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतमित्यपामसोमममृमा अभूमेति च । किं तावद्युक्तम्, अत्र केचिद् अमृत-

◇ चिन्त्यमिदम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्दश्चिरस्थेमानमुपलक्षयति, आभूतसंप्लवस्थानममृतत्वं हि भाष्यत इति वचनात्, अक्षय्यत्वमपि तावत्कालं क्षयानुपपत्तेर्युक्तमतः सिद्धं क्षीणफलत्वं कर्मण इति वर्णयन्ति । तन्न समीचीनम्— श्रुतिसङ्कोचापत्तेः, अक्षय्यपदानुपपत्तेश्च । शक्यार्थवचनो हि क्षय्यशब्दस्तत्प्रतिषेधो ऽ क्षय्यशब्देनोच्यते । कर्मक्षयस्य शक्यत्वपार्थाक्षय्यतेति । किञ्च सामान्यशास्त्रं विशेषेण बाध्यते । तत्र कर्मफलवचनं सामान्यशास्त्रं सोमपानचातुर्मास्ययागादौ न प्रवर्तते, तद्भिन्नविषयत्वादिति युक्तम् । नह्येवं क्वचिद्दृष्टं सामान्यशास्त्रेण विशेषो बाध्यत इति । अपि चेश्वरार्पितकर्मणा कर्मत्वं भगवतैवोक्तम् ।

कर्मण्यकर्मयः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् इति ।।

अस्य व्याख्यानं भाष्यान्तरे, यः कर्मणि परमेश्वरार्पणबुद्ध्या क्रियमाणे, अकर्म बन्धकत्वाभावादिदं कर्म न भवत्येवेति पश्यति । यश्चाकर्मणि विहिताकरणे प्रत्यवायजनकत्वादिदमेव कर्मेति पश्यति स सर्वकर्म कृदपि ज्ञानीयोगीचेत्यर्थ इति । कर्मण्यकर्मभावं विवृणोति—

त्यक्त्वा सर्वफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः । इति ।।

अयमर्थः—

कर्मफलाभिलाषरहित आत्मज्ञानतुष्टो दृष्टादृष्टफलाश्रयरहितो यः कर्माणि करोति स नैव करोति बन्धकत्वाभावात् । ईदृश कर्मणां फलं ब्रह्मप्राप्तिरेव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदुक्तम्--

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणाहुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिनेति ।।

अयमर्थः--

अर्प्यत इत्यर्पणं कर्म तद्ब्रह्म तदर्थत्वात् यद्वा । अर्प्यतेऽनेनेत्यर्पणं मन्त्रादिकं तद्ब्रह्म वाचकत्वात् । हविरपिघृतादिकं ब्रह्मैव तदर्थत्वादेव । ब्रह्माग्नाविति ब्रह्मचासावग्निश्चेति कर्मधारयो ब्रह्म तदात्म्यमग्नेरा□हात एव वक्ष्यति । "अहं वैश्वानरो भूत्वेत्यादि" ब्रह्मणा । शरीरशरिरीणोरभेदोपचाराज्जीवेन । हुतमीश्वरोद्देशेनत्यक्तमित्यर्थस्तेन उक्तलक्षणेन ब्रह्मकर्मसमाधिना । ब्रह्मण्यर्पणीयं यत्कर्म तद्विषयचित्तैकाग्रेण ब्रह्मैव गन्तव्यमिति । अनेनेश्वरेऽर्पितेन कर्मणा ब्रह्मप्राप्तिलक्षणमक्षय्यम्फलम्भवतीत्यवधारितम् । तस्मान्नात्रज्ञानकर्मणोः शेषशेषिभाव विचारोऽवकाशं लभते । यत्र न ब्रह्मकर्मसमाधि स्तद्विषयतया शेषशेषिभाव विचारोपक्रमात् । अत एव--

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं साङ्ख्यञ्च योगञ्च यः पश्यति सपश्यति ।।

इति स्मर्यते । एकविषयत्वादेकस्थानत्वाच्च समानत्वमेव ज्ञानयोगयोरिति सर्वेज्ञानादयो व्यस्ताः समस्ता वा साक्षात्परम्परया वा भगवत्प्रसादस्यैवोपायतामुपयान्तीति तत्वम् अक्षरार्थस्तु इह मनुष्यदेहे देहान्तरे नधिकारात् । कर्माणि ईश्वरप्रसादेतर-

---

□ 'अग्नेः आह अतएव' इति पदच्छेदः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कामरहितानि, कुर्वन्नेव निर्वर्तयन्नेव शतंसमाः यावज्जीवम् । "शतायुर्वै पुरुष इति श्रुते" रधिकस्याभावात् । जिजीविषेज्जीवितु-मिच्छेत् । एवम्, ईश्वरार्पणबुद्ध्या निष्कामकर्माचरणेन प्रकारेण, त्वयि नरे, अनीश्वरे, जीवे, कर्मपुण्यपापरूपं न लिप्यते, बन्धकं न भवति । इतः,उक्तात्प्रकारात् अन्यथा प्रकारान्तरं नास्ति येन कर्मलेपो न भवेदिति । अनेन कर्मयोगस्य भगवदभिमतं श्रैष्ठ्य-मुक्तम् । अत्र भगवत्पादाः—

" एवमात्मविदापुत्रादेषणात्रयसंन्यासेनात्मज्ञाननिष्ठतयात्मा रक्षणीय" इत्येषवेदार्थोऽथेतरस्यानात्मज्ञतयात्मग्रहणायाशक्त-स्येदमुपदिशति कुर्वन्नेवेत्यादीत्याहुः । अत्रेदमवधेयम्— अधिका-रिभेदकल्पनया मन्त्रद्वयव्याख्यानं कयानुपपत्त्या । ननु, ज्ञानकर्म-णोर्विरोधम्पर्वतवरकम्पं न स्मरसि किमिति चेत् । किं कर्म सामान्येन विरोधस्त्वयाभिप्रेयते तद्विशेषेण वा । नाद्यःज्ञानिकृत-कर्मणामपि बन्धकत्वापत्तेः,न च ज्ञानिनः क्व कर्माणीति वाच्यम् । तत्कर्मणाम्प्रागेवोक्तत्वात्—

नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।

इतिस्मृतेः कर्मसामान्याभावानुपपत्तेः । द्वितीये तु केन-चित्कर्मणा विरोधेप्यनेन न विरोध इत्युपगन्तव्यम् । तथा च येन कर्मणा न विरोध स्तत्कर्तव्यमित्येष वेदार्थो न पुनः संन्यासनित्य-तेति विद्याञ्चाविद्याञ्चेत्येतद्व्याख्यानावसरे विवेचयिष्यते । अत एवोक्तं भगवता।—

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तममिति ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ननु—

सर्वकर्माखिलं पार्थ ज्ञाने परिसमाप्यते ।

इत्यप्यस्ति भगवद्वाक्यम् । ज्ञाने परिसमाप्तिर्नाम ज्ञानजन्याजनकत्वे सति ज्ञानजनकत्वमेव । तथा च व्याससूत्रम्—

सर्वापेक्षा च यज्ञादि श्रुतेरश्ववदिति ।

अयमर्थः— तत्वज्ञाने सर्वधर्मजन्यादृष्टापेक्षा विविदिषन्ति यज्ञेन दानेन तपसा ऽनाशकेनेति श्रुते : ।

कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते ।

इति स्मृतेश्च यथाऽश्वोरथचालनादौ विनियुज्य● योग्यत्वात् नतु लाङ्गलाकर्षणादावयोग्यत्वात् तथात्रापीति तत् कथं यावज्जीवं कर्मानुष्ठानमुच्यत इति चेत्सत्यम् ।

यज्ञार्थान्य// ज्ञानविरोधिनाङ्कर्मणां ज्ञाने परिसमाप्तिरित्यभ्युपगमात् । ज्ञानाविरोधिनान्तु कर्मणां यज्ञार्थानां यावज्जीवमनुष्ठाने का क्षतिः कर्मयोगस्य निःश्रेयसोपायताया उक्तत्वात्, संन्यासापेक्षया प्रशस्तत्वाच्च । 'तपःस्वाध्यायेश्वरप्रणिधानानि कर्मयोग, इति पातञ्जलसूत्रे स्वस्वाश्रमविहितकर्मणामीश्वरेऽर्पणं कर्मयोग इति व्याख्यानदर्शन दर्शनात् । ज्ञानजन्या जनकत्वेसति ज्ञानजनकत्वमपि यज्ञार्थान्य कर्मणामेव । यज्ञार्थान्तु ज्ञानजन्या जनकत्वमसिद्धमेव ।

ज्ञानाद्ध्यानं विशिष्यते ध्यानात्कर्मफलस्त्यागस्त्यागाच्छान्तिरनुत्तमेत्यत्र कर्मफलत्यागो नामेश्वरे फलसमर्पणम् । ततो

● 'विनियोज्यो' इति साधुः स्यात् ।

// 'यज्ञार्थानां ज्ञानविरोधिनां' इति युक्तः पाठः स्यात् ।

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

मोक्षलक्षणाशान्तिर्भवतीत्यनेन मोक्षजनकत्वं तदर्थं कर्मणा-मुक्तम्भवति। नहीदृशानां कर्मणां ज्ञानपूर्वकालिकमात्रत्वं शक्य-वचनम्, येन ज्ञानाङ्गत्वमेषां संभाव्येत। ननु ज्ञानकर्मणोर्विशेषण-विशेष्यभाव व्यत्यासेन कार्यकारणभावद्वयप्रसङ्गः। न द्वयप्रसङ्गः। ईश्वरप्रसादस्यैव मोक्षकारणताया उक्तत्वात्। तत्रैव तयोरुप-योगात्। न चेश्वरप्रसादस्य द्वारतया ज्ञानकर्मणोर्नान्यथासिद्धिर्यथा यागस्यापूर्वेणेति वाच्यं विषमत्वात्। अपूर्वं हि नियमेन यागसा-पेक्षं न यागमन्तरेणापूर्वोत्पादः, ईश्वरप्रसादस्त्वन्तरेणापि ज्ञान-कर्मणी भवत्येव। 'तै र्यद्विसृष्टानपि यद्वनौकसश्चकार सख्यं वत लक्ष्मणाग्रज" इति स्मृतेः। तैरित्यस्य पूर्वार्द्धोपात्तैर्ज्ञाना-दिभिरित्यर्थः। राजन्यमनुगृण्हामीत्यनेनानुग्रहस्य स्वाधीनत्वं यमिति वित्तेषानभिधानात्सर्वस्यैवानुग्रहविषयत्वं सूच्यते। नो भगवत्प्रसादम्प्रति ज्ञान कर्मणोरन्यथासिद्धिरेव। भवत्वेवं यस्य ज्ञानकर्मभ्यामेव भगवत्प्रसाद स्तत्र नान्यथासिद्धिरतस्तदवस्थ एव कार्यकारणभाव-द्वयप्रसङ्ग इति चेन्न। साहित्यस्य वक्षमाणत्वात्। यत्तु, अत्र चित्तशुद्धि द्वारेणाऽऽरादुपकारकं कर्म। सन्निपत्योप-कारकं तत्वज्ञानम्। नतु समप्राधान्यमाग्नेयादिवत्। नापि विकल्पेन व्रीहियववत्। दृढभूमिसवासनमिथ्याज्ञानोच्छेदंविना मोक्षासम्भवात्, मिथ्याज्ञानप्रागभावासहवृत्तिमिथ्याज्ञानध्वंस-रूपस्य तस्य ज्ञानैकसाध्यत्वादिति वदन्ति। तथापि ज्ञानकर्मणोः साहित्यस्याक्षतेः—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।
कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति स्मृतेर्ज्ञानोत्तरमपि कर्मयोगस्यावारणात् । वस्तुतः कर्मयोगस्यैव सन्निपत्योपकारकत्वं युक्तम् । "जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेज" इत्यादिना कर्मयोगस्यैव मुक्तिहेतुत्व-प्रतिपादनात् ।

कर्मणैव हि संसिद्धिमास्थिता जनकादयः, इतिस्मृतेश्च ।
कुरु कर्मैव तस्मात्त्वं कर्म ज्यायो ह्यकर्मणः

इत्युपसंहारे मुक्तिहेतुत्वेन कर्मण एवोपदेशाच्च । कर्मणो ज्यायत्वमपीश्वरार्पितत्वेन मुक्तिहेतुत्वमेव । इदमेव कर्माद्वैत-मित्युच्यते ।

तदुक्तम्——

यदीश्वरे भगवति सर्वकर्मसमर्पणम् ।
मनोवाक्तनुभिः पार्थ क्रियाऽद्वैतं तदुच्यते ।।

इति । विषयफलयोरैक्याद्धि कर्माद्वैतम् । न च ब्रह्मसं-स्थोऽमृतत्वमेतीति श्रुतेर्भिक्षोरेव मोक्षेऽधिकारः । अतएव——

मोक्षाश्रमश्चतुर्थोऽयं यो भिक्षोः परिकीर्त्तितः ।

इति स्मर्यत इति वाच्यम् । "तत्वज्ञाननिष्ठो गृहस्थोऽपि विमुच्यते" इति चिन्तामणि कारोपन्यस्त श्रुतेर्न्यायागतधन-स्तत्वज्ञाननिष्ठोऽ तिथिप्रिय : "श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते । "

इति स्मृतेश्च । 'ब्रह्मसंस्थ' शब्देनाश्रमचतुष्टयस्यैवोप-संग्रहात् । भिक्षुमात्रग्रहणे मानाभावात् । मोक्षाश्रमश्च-तुर्थोऽयमिति तु सावधारणम् । मोक्षाश्रम एवेति– तेन पुण्यलो-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काश्रमत्वमस्य व्यवच्छिद्यते । इतरस्तु ब्रह्मसंस्थतायामेव मोक्षाश्रमोऽन्यथा तु पुण्यलोकाश्रम एवेति । गृहस्थानां पुत्रदारादिसंसर्गस्य दुर्वारतया तथोक्तेश्च । यद्यपि अनुष्ठेयं वादरायणः "साम्यश्रुते" रिति सूत्रे परिव्राजकमात्रानुष्ठेयं यत्कर्म तदेव 'ब्रह्मसंस्थ' शब्देनोच्यते । द्वितीयतृतीयैतत्पदोपादानादेकवाक्यत्वावगमात्तत्र चोपक्रमस्य बलत्वादुपक्रमेव❀ यज्ञादिरूपा साधारण धर्मेण गृहाश्रमोक्त्या भिक्षाश्रमस्यापि तदसाधारणधर्मेणववतुमुचितत्वात् तपःशब्देनाश्रमद्वयोक्त्यसम्भवादसाधारणधर्मेण—तत्तदाश्रमाभिधानरूपसाम्यानुरोधादवसादयन्नित्यन्तेनाश्रममत्रयस्योक्तत्वात्सर्व एत इत्यादिना तन्निन्दानुवादेन च ब्रह्मसंस्थ इत्यादिना भिक्षु त्वं स्तूयत इत्येव सिद्धान्तितः। तथाप्याश्रमान्तरानुक्तत्वरूपमसाधारण्यन्नात्र विवक्षितम् । अध्ययनस्य ब्रह्मचार्याश्रमसाधारण्येनव्यभिचारात् । दानस्य सर्वसाधारण्यात् । तपसोऽपि भिक्ष्वादिसाधारण्येनवानप्रस्थमात्राभिधानानुपपत्तेश्च। यत्तु वानप्रस्थानामसाधारणोधर्म स्तपः कायक्लेश प्रधानत्वात् तपः शब्दस्य तत्र रुढोर्भिक्षोस्तु धर्मइन्द्रियसंयमलक्षणो नैव तपः शब्देनाभि लप्येतेति । तन्मन्दम् । इन्द्रियसंयमादेरप्यप्रतिकायक्लेशत्वात् । शीतवातातपसहनकौपीनमात्राच्छादनग्रामैकरात्रवासभिक्षिताशनादिबहुतरकायक्लेशविधानात्तपस्वित्वाक्षतेः । यदपि चतुष्ट्वेन प्रसिद्धा आश्रमास्त्रित्वेनपरामृश्यन्त—इत्यन्यायमिति । तदप्यसत् । गृहत्यागसाम्येन नवीयत्वोरन—

❀ अत्र व शब्दस्वार्थे वर्तते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिरेकात् । कतिपयधर्मभेदात्तु चतुष्टव्यवहारः । अवस्थाविशेषो हि पुरुषनिष्ठ आश्रमपदार्थः सतु त्रिविध एव । पत्नीसंबन्धात्प्राचीनावस्था ब्रह्मचर्यम् । पत्नीसंबन्धावस्थागार्हस्थ्यम् । तत्त्यागावस्थावनभैक्ष्याचरणरूपेति त्रित्वेन परामर्षोपपत्तिः । तथा च व्याससूत्रम्

"परामर्शं जैमिनि रचोदना चापवदति हीति।" चतुर्णां मर्शं 'ब्रम्हसंस्थ' शब्दे न जैमिनिवक्तीति तदर्थः–

तथाहि– त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमः । तप एव द्वितीयः । ब्रह्मचर्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानामाचार्यकुलेऽवसदायन्सर्व एवैते पुण्यलोका भवन्ति । ब्रह्मसंस्थोऽमृतत्वमेति एतमेव प्रव्राजानिनोलोकमभीप्सन्तः प्रव्रजन्तीति । तत्र यज्ञाध्ययनदानावच्छिन्नत्वेन गृहाश्रमस्तपोऽवच्छिन्नत्वेन वनिभिक्षुरूपमाश्रम द्वयम् । ब्रह्मचारीचेत्येवं चतुर्णामाश्रमाणामेतत्पदेन परामर्शात् पुण्यलोकत्वमुक्त्वा तेषाम्मध्ये ब्रह्मनिष्ठो मुक्तिभागित्यर्थ इति व्याचख्युः । वस्तुतोऽनन्यार्थव्यापारत्वलक्षणं ब्रह्मसंस्थत्वं गृहस्थादेरपिनासं भवतीत्यतो ब्रह्मसंस्थत्वमनुष्ठेयम् । अन्यथा कर्मणांभिन्नफलत्वेनानिर्मोक्षप्रसङ्गात् । गृहस्थमुक्तिप्रतिपादकोक्तश्रुतिस्मृतिव्याकोप प्रसङ्गाच्च । तस्माद्यावज्जीवं यज्ञार्थत्वेन कर्माणि कुर्वन्नेव जिजीविषेत् जीवितुमिच्छेत् । अनेन यज्ञार्थकर्मानुष्ठानार्थमेव जीवनमिष्टमतो जीवनस्यापि नान्यत्फलमिति शास्त्रार्थः अथैवं यो न कुर्यात्तन्निन्दार्थमिदमुच्यते:–

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

असूर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तां स्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ।।३।।

आसुरीं सम्पदप्राप्ता असुराः–

प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुराः ।
न शौचन्नापि चाचारो न सत्यं तेषु विद्यते ।।
असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ।।

इत्यासुरी सम्पदुक्ता वेदितव्या । न त्वसुरत्वजातिमन्तोऽत्र विवक्षिताः । प्रल्हादादिष्वति प्रसङ्गात् । देवानामपीदृशमसुरत्व-मिष्टमेवेति न कदाचिदनुपपत्तिः । तर्ककुतुहलकृतस्तु, आत्म-तत्वाभिज्ञत्वेनाविदुषामसुरपदेनोपादानमित्याहुः । भाष्यकृतस्तु– "परमात्मभावमद्वयमपेक्ष्य देवाऽ अप्यसुरास्तेषाञ्च स्वभूता असुर्या इत्याहुः" इदमत्रवक्तव्यम् । अपरमात्मभावाद्वैतज्ञान-विधुरत्वमिति कुतो लब्धम् ।

मम तु–

दंभोदर्पोऽभिमानश्च क्रोधः पारुष्यमेवच ।
अज्ञानश्चाभिजातस्य पार्थ सम्पदमासुरीम् ।।

इति स्मृतिरेवोक्तार्थे प्रमाणम् । ननु ममाप्येतदेव प्रमाण-मज्ञानञ्चाभिजातस्येत्युक्तेरद्वैतान्यस्यैवाज्ञानपदार्थत्वादिति चेन्न असिद्धेः– "अमानित्वमदंभित्व" मित्यादि भगवदुक्तविंश-तिधर्मसमुदायस्य ज्ञानपदार्थत्वात्तद्भिन्नस्यैवाज्ञानत्वात् । अज्ञानं वदतोऽन्यथेत्युक्तेः, न च विंशत्या धर्मैरद्वैतज्ञानमेव भवतीति वाच्यं मानाभावात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनादि मत्परं ब्रह्म न सत्तन्ना सदुच्यते ।

इत्यादिनोक्ततत्तद्धर्मप्रकारेण तत्वसाक्षात्कारो भवतीति तस्यैव ज्ञानत्वात् ।

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ।।

इत्युक्ते भेदज्ञानस्यैवपुरुषार्थहेतुत्वावगमात् । अद्वैतस्य स्वकल्पनामात्रकल्पिततत्वादिति निपुणतरं विभावनीयम् । "नामेत्यनर्थको निपातः" इति भाष्यकृतः प्रसिद्ध्यर्थक-इति तु बहवः । ते लोका इति लोक्यन्त इति लोकाः कर्मफलभोगाधिष्ठानत्वात् । अन्धेन अदर्शनात्मकेन तमसाः मिथ्याज्ञानेन रागादिद्वारेण प्रवृत्तिहेतुत्वात् । आवृताः आच्छादिता व्याप्ता इति यावत् । तत्रापि मिथ्याज्ञाननिवृत्तेरयोगात् तान् स्वर्गतिर्यङ्नरकादिरूपान् । ते रागादिमत्वेन सकामकर्मपराः प्रेत्य इदं देहं त्यक्त्वा अभिगच्छन्ति तत्तत्कर्मानुसारेण प्राप्नुवन्ति । के ते इत्याकाङ्क्षायामाह—ये के चात्महनो जना इति । आत्मानं घ्नन्तीत्यात्महनः जनाजन्मवन्तः । तथा च जन्ममरण प्रवन्धोच्छेदानभिज्ञा इति फलितम् ।

एतद् व्याख्यातम्भागवते—

नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारणम् ।
मयानुकूलेन नभस्वतेरितम्पुमान्भवाब्धिं नतरेत्स आत्महा ।

इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथा चावश्यं वीतरागेण कर्मयोगिना भवित◇मिति तृतीयमन्त्रार्थः ।। ३ ।।

अथेदानीं येनेश्वरेणेदं सर्वं व्याप्तं यदर्थानि कर्माणि नियमेन कर्तव्यानि स ईश्वरः किंस्वरूपः किं प्रभावः,इत्याकाङ्क्षायामिदमुपदिश्यते:–

अनेजदेकम्मनसो जवीयो नैतद्देवा□ आप्नुवन् पूर्वमर्षत् । तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ।।४।।

एजृकम्पने– एजतेकम्पत इत्येजत् क्रियाजत●परिच्छिन्नं जडमिति यावत् । तद्भिन्नमनेजत् व्यापकञ्चेतनमिति यावत् । अनेन स्वरूपमुक्तम् । ननु, चेतनस्वरूपो जीवः स्यादित्याशङ्कायामाहः , एकमिति एकत्वेतरसंरव्याशून्यम् । जीवानेकत्वस्य वक्ष्यमाणत्वान्न प्रसङ्गः । यद्वा 'एकेमुख्यान्य केवला' इति कोषान्मुख्यमित्यर्थः । मुख्यत्वञ्च ज्ञानाज्ञाना व्यभिचारित्वम्। जीवस्य सुषुप्त्यादौ ज्ञानव्यभिचारान्न प्रसङ्गः । अनेन ज्ञान शक्तिमत्व मुक्तम् । क्रियाशक्तिमाह– मनसोजवीय इति । ल्यब्लोपे पञ्चमी । मनोऽपेक्ष्यजव वत्तरमित्यर्थः । ननु, व्याहतमुच्यतेऽनेजदोजवत्तरम् । नैषदोषः–"यो मनः सि तिष्ठन् यो मनसोऽन्तरोऽयं मनो न वेद यस्य मनः शरीरं, यो मन आन्तरोयमयत्येष त

◇ 'भवितव्यम्' इति साधुः स्यात् ।

□ 'नैनद्देवा' इति मूलपुस्तक पाठः ।

● चिन्त्यमिदम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आत्माऽन्तर्या○म्यमृत" इति श्रुतेर्मनः शरीरस्यात्मनोमनोवच्छिन्न क्रियानुकूलप्रयत्नवत्वेन सक्रियत्वोपचारात् । चैत्रोगच्छती-त्यादावात्मनो निष्क्रियत्वेऽपि तच्छरीरसमवेतचेष्टाजनक प्रयत्नाश्रयत्वेन तद्व्यवहारवत् । इयमेवहि क्रियाशक्तिरीश्वरस्य यज्जडेष्वपि क्रियोत्पादनसामर्थ्यम् । अत एव भगवत्पादाः- "कथं विरुद्धमुच्यते ? ध्रुवं निश्चलमिदम्मनसोजवीय इति च"। नैषदोषः, निरूपाध्युपाधित्वेनोपपत्तेः । तत्र निरूपाधिना स्वेन रूपेणोच्यतेऽनेजदेकमिति । मनसोऽन्तः करणस्य सङ्कल्प विकल्पलक्षणस्योपाधेरनुवर्तनादिह देहस्थस्य मनसो ब्रह्म-लोकादिदूरस्थसङ्कल्पनं क्षणमात्राद्भवतीत्यतो मनोज■वीष्ठ लोकसिद्धम् । तस्मिन्मनसि ब्रह्मलोकादीन्द्रुतं गच्छति, प्रथम-प्राप्त इवात्मचैतन्यावभासो गृह्यतेऽतो मनसोजवीय इत्युक्त-मित्याहुः । नत्वियं क्रियाशक्तिर्जीवस्यैवास्तित्याशङ्कायामाहः नैतद्देवा आप्नुवन्निति । देवा इति सर्वजीवोपलक्षणम् । तथा च ब्रह्मादयोप्येतत्परमात्मस्वरूपन्नाप्नुवन् । न प्राप्तवन्तः । अय-मत्रेतिहासः- सर्वेषां पूर्वजोऽपि हि द्रुहिणः कल्पादौस्वोत्पत्ति-कारणमन्वेष्टमाणः पद्मनालेनार्णवमाविशत् । तत्राकल्पमनु-धावन्नपि न प्राप्तवान्, किन्तु वीप्सितञ्चतुरक्षरं तपतपेति शब्द मेवाऽऽश्रुत्य निवृत्तस्तपश्चकार । ततः परमात्मप्रसादादीश्वर-म्प्रपञ्चञ्च दृष्टवानिति । अनेनेश्वरप्रसादमन्तरेण केनापि न प्राप्तव्य इति दृढीकृतम् । भाष्यकृतस्तु "द्योतनाद्देवा श्चक्षुरा-

---

○ 'ऽन्तर्याम्यमृतः' इति साधुः ।

■ 'जविष्ठमिति साधुः' स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दीनि ✿ न्द्रियाणि"। एतत् प्रकृतमात्मतत्वम्।नाप्नुवन्नप्राप्तवन्तः। तेभ्यो मनोजवीयो मनोव्यापारव्यवहितत्वादाभासमात्रमप्यात्मनो नैतद्देवानां विषयी भवति । तस्माज्जवनान्मनसोऽपि पूर्वमर्षत् पूर्वमेवगतम् , व्योमवद् व्यापित्वादितिव्याचख्युः । तदेव स्पष्टयति तद्धावतोऽन्यानत्येति तत् ब्रह्म धावतः द्रुतंगच्छतोऽपि अन्यान् जीवराशीन् अत्येति अतिक्रम्य गच्छति। ईश्वरप्राप्त्यर्थं गच्छताम-ग्रतो गच्छन्निव प्रतीयत इत्युपचारादत्येतीत्युक्तम् । निष्क्रियत्वेन तत्र गत्यसम्भवात् । तदेवाह-- तिष्ठदिति यथावस्थितस्वरूप-मेवेत्यर्थः प्रदेशावस्थितौ देशतः परिच्छेदप्रसङ्गात् । भाष्यका-रास्तु--अन्यानिति आत्मनो वागिन्द्रियादीनात्मविलक्षणनिति व्याचक्रुः । अस्मिन्नर्थे यद्यपि "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति"श्रुति र नुकूलेव भवति तथाप्यधिष्ठातारमन्तरेण वागिन्द्रियादेः प्रवृत्तिनिवृत्ययोगादधिष्ठातृनिवृत्तिरेव वागादिनि-वृत्तिशब्देन लक्ष्यतेऽचेतनस्याधिष्ठातृत्वायोगाच्चेतनरूपत्वे सिद्ध-मात्मान्तरेणेति किमन्यथा व्याख्यानेन । ननु, यथावस्थित स्य गच्छतीवेति प्रतीतिविष + तापि नयुज्यते । नैषदोष इत्याह-- तस्मिन्नित्यादि । तस्मिन्नित्यचैतन्यवती-श्वरे अयः कर्माणि मातरिश्वावायुर्दधाति धारयति अयमर्थः यो वायौ तिष्ठन्योवायोरन्तरोऽयं वायुर्न वेद यस्य वायुःशरीरं यो वायुमन्तरोऽयमपत्येष त आत्माऽन्तर्याम्यमृत इति हि श्रुतिवायुशरीरत्वमीश्वरस्य प्रतिपादयति । तथा च वायुशरीरेति

✿ 'चक्षुरादीनीन्द्रियाणि' इति साधुः ।

\+ 'विषयतापि' इति साधुः स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्मिन्न कर्मानुपपत्तिः सदागतित्वाद्वायोः स्वतः कर्माभावान्मातरिश्वा दधातित्युक्तम् वायुकर्मैव तस्मिन्नुपपर्यत[illegible] इति भावः ।।४।।

इदमेव स्पष्टयन्नाह--

तदेजति तन्नैजति तद्दूरे तद्वदन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत : ।।५।।

तदिति परमात्मनः स्त्रीपुन्नपुंसकत्वानुपपत्तेः सामान्ये नपुंसकम् । एजति नित्यक्रियावत् । वाय्ववच्छेदेन सर्वदा गतिमत्ता प्रतीतेः प्रलयादावपि वायुपरमाणुसद्भावात् । तन्नैजति विभुत्वेन चलनासम्भवात्क्रियासामान्यशून्यमित्यर्थः । तद्दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वादिति भाष्यकृतः । तद्वदन्तिके अन्तिकेऽपि तद्वत् । अत्यन्तान्तिकवदेवेत्यर्थः । विदुषां हृदयदेश एव सुलभत्वात् । तदन्तः अभ्यन्तरे सर्वान्तरत्वश्रुतेः, अस्य सर्वस्य-चिज्जडात्मकस्य । तदु उ अपि तत्सर्वस्यास्य जगतो वाह्यतः व्यापकत्वात् । आकाशवत्सर्वगतश्च नित्य इति श्रुतेरिति ।।५।।

तदेव नित्यज्ञानक्रियाशक्तिभ्यां निरतिशयम्महात्म्यमुक्त्वा तस्य यादृशज्ञानेन पुरुषार्थलाभ स्तदाह ।

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते[illegible] ।।६।।

यस्तु परिव्राडिति भाष्यकाराः, यस्तु वीगतराग इति युक्तम्। चातुराश्रम्यस्य मुमुक्षुत्वोपपत्तेरुक्तत्वात् । स्त्रीशूद्रादीनाम-

---

[illegible] 'जुगुप्सत' इति युक्तं स्यात् ।
[illegible] 'विचिकित्सति' इति साधुः स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पीतिहासादितस्तत्वज्ञाने मोक्षोपपत्तेश्च । ननु कथंमिदमुपपद्यते-शूद्रादेरनधिकारात् । तथा हि तमेतं ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशक्ते□त्यादि मोक्षजनकात्मप्रतिपत्तेर्ब्राह्मणाधिकारित्वावगमादन्याधिकारनिरासात् । राजसूयेन यजेत राजा, स्वाराज्यकाम इत्यादौ क्षत्रियातिरिक्तस्यानधिकारवत् । यदि तु रागातिशयेनोपनिषद्वाक्येभ्य आत्मानं श्रुत्वा तत्मननं शूद्रादि कुर्यादपि न तदाप्यात्मसाक्षात्कारं मोक्षं वासादयेदनधिकारिकृत त्वेनाकृतत्वात् । अथ शूद्रोऽपि मोक्षाधिकारी । मनन भागित्वाद् ब्राह्मणवदीति चेन्न । नह्यनेनाधिकार उत्पाद्यते किन्तु ज्ञाप्यते स च नास्तीति कथमनुमानेनापि ज्ञाप्यतामसत्वाद् ह्रदे वन्हिवत् । तदुक्तमभियुक्तैः "अनुमानमप्यागमाविरोधेन प्रवर्तमानमर्थनिश्चयक" मिति । तथा च ब्राह्म॥ एवात्राधि क्रियते न शूद्रः प्रत्यक्ष श्रुतिविरोधादिति चेत् सत्यम् । करुणार्द्रान्तः करणा मुनयोऽनधिकारिणो प्युपदिशन्ति चिकित्सापराङ्मुखानिव चरकादयः । अत एव महाभारतं सप्रयोजनम् । न चानधिकृतोपदेशेन मुनयः प्रत्यवेयुः, क्षीणदोषतया तेषां तदनुत्पादात् । उत्पादे वा तपः प्रभावादेव तदपगमादिति सर्वं सुस्थम् । सर्वाणि भूतानि सर्वान् प्राणिनः, भूतशब्दस्य प्राणिवचनत्वात् । अस्मिन् भूतान्यन्यत्र-तीर्थेभ्य इत्यत्र तथा दृष्टत्वात् । बहुवचनंजीवा◇ मनन्तत्वज्ञापकतया सफलम् । सर्वशब्दोऽनेकाशेषचवनोऽखिलस्य बहिर्भाव-

---

□ 'अनाशक्त्या' इति साधुः ।

॥ 'ब्राह्मणे' इति स्यात् ।

◇ 'जीवानामनन्तत्व' इति साधुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नानर्हतामाह । आत्मनि परमात्मनि पश्यति परमात्माश्रितानि पश्यतीत्यर्थः, आश्रयत्वस्य सप्तम्यर्थत्वात् । अनुशब्दः पूर्वमेवमपश्यतोऽपि मननान्तर दर्शनज्ञापनार्थः । एवं सर्वभूतेषु चात्मानं सर्वजीवेषु परमात्मानं, आत्मशरीरत्वात्परमात्मानः तथा च श्रुतिः–

"यः आत्मनि तिष्ठन्नात्मन अन्तरोऽयमात्मानंवेद यस्यात्मा शरीरं यः आत्मानमन्तरो ऽ यमयत्येषत आत्मा अन्तर्याम्यमृत इति ।"

ततः परमात्माश्रितत्वपरमात्मशरीरत्वाभ्यां विशिष्टत्वेन स्वात्मनो दर्शनानन्तरम् । न विचिकित्सति संशयं न करोति संशयात्प्रमुच्यत इत्यर्थ : तदुक्तम्––

भिद्यते हृदयग्रन्थि श्छिद्यते सर्व संशयाः ।
क्षीयन्ते चास्यकर्माणि तस्मिन्दृष्टे परावरे ।।इति

अयं ह्यस्यार्थः– नहि तस्य चाक्षुषं ज्ञानं संभवति रूपाभावात्। अत एव नरासनादिकमपि श्रावणन्तु शब्दजन्यप्रतीतिरूपं न स्वरूपविषये प्रवर्तते गुणवृत्तित्वाच्छब्दश्य । अत एव–

यानि नामानि गौणानि विख्यातानि महात्मनः ।

इत्यादिना मुख्यनामशून्यत्वं सूच्यते । ब्रह्मशब्दादेर्मुख्यत्वव्यवहारस्तु पुष्कलगुणयोगादुपपन्नः । तथा च शाब्दः प्रत्ययो न साक्षात्कार शब्देनोच्यते । न चात्मान्याविषयकज्ञानस्यैव साक्षात्कारत्वेन तस्य शाब्दत्वे किं बाधकमिति वाच्यम् । मननादिविधिवैय्यर्थ्यप्रसङ्गात् । न च तयोः श्रवणाङ्गत्वान्न वैयर्थ्यमिति वाच्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्य श्चोपपत्तिभिः ।
मत्वा च सततं ध्येय । इति क्रमबोधकस्मृति विरोधात् ।

ननु, दशमस्त्वमसीत्यत्र शाब्दः साक्षात्कारोदर्शितः । न दर्शितः, किन्तु सिद्ध एव साक्षात्कारोऽज्ञानपराहतत्वाद्विस्मृतः शब्देन स्मारित इति नापि मानसः, अतीन्द्रियत्वाप्रामेयत्वश्रुति-विरोधापत्तेः । किन्तु तदवच्छेदकशरीरतया यस्यात्मा शरीर-मित्यादौ श्रुतस्य स्वात्मनो मानसः साक्षात्कार एव परमात्मसा-क्षात्कार इत्युच्यते । तस्मिन्सति यो वेदान्तदर्शनसमुद्भवो ब्रह्मैवेदं सर्वमित्यात्मैक्यसमर्थनाग्रहरूपो हृदयग्रन्थिर्यो वा नास्तिकदर्शन-समुद्भवो जीवात्मैक्य समर्थनाग्रहरूपो हृदयग्रन्थिः स भिद्यते । एवं नानाविधविरुद्धदर्शनप्रतिपत्तिजन्मानः सर्व संशयाः किं ब्रह्मात्मैं(क्य)वाद★ स्तत्य माहोस्विज्जीवात्मैक्यवाद इत्येवं विधा नाना संशयाश्छिद्यन्ते । परमात्मैक्यस्य श्रुतिसिद्धत्वात् । सर्वेषामाश्रयभूतस्य सर्वनियन्तुः परमात्मनस्तत्वज्ञाने सति तदर्थ-मेव प्रवृत्तेः कर्माण्यपि क्षीयन्त इति । न च जीवब्रह्मणोर्भेदे माना-भावः शंक्यः, भेदनियतश्रौतसप्तम्यां एव मानत्वात् । जुष्टं यदा पश्यत्यन्यमीशमित्यादौ भेदवाचकान्यशब्दप्रयोगाच्च । अनुमान-मपि च भेदसाधकम् । तथा हि जीवः परमात्मनिष्ठतादात्म्या प्रतियोगी । तदवृत्तिधर्मावत्वात् । घटवज्जीवः परमात्मनिष्ठा-नौपाधिकभेदप्रतियोगी । भेदपूर्वकालीनाभावप्रतियोग्युपाधि-रहितत्वात् । यो यन्निष्ठस्यानौपाधिकभेदस्याप्रतियोगी स तद्भेद-पूर्वकालीनाभावप्रतियोग्युपाधिसहितो यथा चैत्र निष्ठानौपाधिक-

---

★ 'ब्रह्मात्मैक्यवादस्सत्य आहोपस्वि.....' इति साधु भवेत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भेदाप्रतियोगी तत्क्षणाद्यवच्छिन्नश्चैत्रस्तत्पूर्वकानाभावप्रतियोगि तत्क्षणादिरूपोपाधिमानिति व्यतिरेकी, अविद्या हि भेदोपाधित्वेन परेषामभिमता । सा च न भेदपूर्वकालीनाभावप्रतियोगिनी अनादित्वात् । भेदस्यापि तैरनादित्वस्वीकारेण तत्पूर्वकाला-प्रसिद्धेश्च । न च त्वन्मतेऽपि भेदस्य नित्यतया तत्पूर्वकाला-प्रसिद्धिरिति वाच्यम् । भेदसंबन्धस्य विवक्षितत्वात् । यद्वा परमात्मनि जीवभेदोऽनौपाधिकः, अनादित्वात् चिज्जडभेदवत् । श्रौतोऽयं जीवपरमात्मनोर्भेदः श्रौतधर्मभेदवत्वात् । शुच्यशुचि भेदवत् स्वाभाविकोऽयं भेदः स्वाभाविक धर्मभेदात् । छायातप-भेदवत् । न चाप्रयोजकं श्रुति प्रतिपन्नत्वात् ननु शुद्धचैतन्यस्य धर्मानधिकरण ताया साध्यहेतो रश्रावःउपहितो च शुद्धसाधनम् । तदुक्तम् ।

अप्रमेयेऽनुमानस्य प्रवृत्तिर्न कथञ्चन ।
प्रमेयस्य त्वमात्मत्वा त्तत्र भेदानुमेष्यते ।।

इति चेन्न । धर्मानधिकरणत्वं हि धर्माधिकरणत्वाभावाधि-करणत्वम् । तथा च व्याघातः, धर्माधिकरणत्वाभावस्यापि धर्म-स्याविशेषात्तस्यापि शुद्धेवक्तुमशक्यत्वात् । अथ तदभावोऽधि-करणस्वरूप एवेति, चेत्तर्ह्यनौपाधिकत्वमनादित्वं चेत्यपि तथै-वास्तु । सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुत्यनुरोधेन मिथ्यात्वाभाव-रूपं सत्यत्वम् । प्रपर प्रकाश्यत्वाभावरूपं स्वप्रकाशत्वम् । विनाशित्वा भावरूपं नित्यत्वम् । देशकाल परिच्छेदा भावरूप-मनन्तत्वञ्च तत्रावश्यमङ्गीकर्तव्यम् । तस्माद्धर्मानधिकरणत्वम-सिद्धम् । न च धर्माभावोऽपि तत्र नास्तीति वाच्यम् । प्रतियोगि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सद्भावप्रसङ्गात् । तद्भावानाश्रयस्य तद्वत्वनियमादित्यास्तां विस्तरः । ननु जीवाः परमात्मनस्तत्वतो न भिद्यन्ते ; आत्मत्वात्परमात्मवदित्यनुमानमभेदे प्रमाणमिति चेन्न । परमात्मप्रतियोगिकतात्विकभेदाभावे साध्ये प्रतियोग्यप्रसिद्धेः । न च त्वद्वीत्यैव तदिति वाच्यम् । दृष्टान्तस्योभयसम्प्रतिपन्नत्वनियमात् । न च त्वदुक्तभेदानुमाने दुःखादेरन्तःकरणधर्मत्वेन स्वरूपासिद्धिरितिवाच्यम् । अहं सुखीत्यादि प्रत्यक्षेणात्मधर्मत्वसिद्धेः । न च कामः सङ्कल्पो विचिकित्साश्रद्धाधृतिर्ह्रीर्भीर्धीरेतत्सर्वं मन एवेति श्रुतेस्तेषामन्तः करणधर्मत्वसिद्धिरिति वाच्यम् । आयुघृतमितिवत्कार्यनिमित्तयोरभेदोपचारेण सामानाधिकरण्योपपत्तेः । अन्यथा तद्व्यवहितपूर्वमेव।अन्यत्रमना◣वभूवन्नाश्रौषमन्यत्रमना अभूवन्नादर्शमन्यत्रमना अभूवन्नाश्रौषमिति । मनसा ह्येव पश्यति मनसा ह्येव शृणोतितीत्युक्तमसङ्गतं स्यात् । ततो हि दर्शनाद्याश्रयत्वमात्मन उक्त्वा मनसः करणत्वेनोपक्रमात् । तस्मादपि पृष्ठतः उपस्पृष्टो मनसा विजानातीति करणत्वेनैवोपसंहाराच्च । एतेन कुलालो घट इति सामानाधिकरण्याऽदर्शनान्न तथेति चित्सुखाचार्योक्तिः परास्ता । अथ तत्वमसीत्येतस्य नवकृत्वोऽभ्यासादेवाभेदसिद्धिस्तत्र तच्छब्दस्य कारणोपाध्यवच्छिन्नचैतन्यवाचित्वात् । त्वं शब्दस्य कार्योपाध्यवच्छिन्नचैतन्यवाचित्वात् । तयोः सामानाधिकरण्यमघटमानं विरुद्धांशत्यागलक्षणया शुद्धचैतन्यनिर्द्धारयति । तस्मादौपाधिक एव जीवेश्वरयोर्भेदो घटमठाका-

---

◣ 'अन्यत्र मना वभूव नाश्रौषम्, अन्यत्रमना अभूवं ना दर्शम्, अन्यत्रमना अभूवं नाश्रौषम्' इति युक्तः स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शयोरिवेति चेत्मैवम् । तत्वमसीत्यस्य भेदेप्युपपत्तावभेद एव तत्तात्पर्यमित्यत्र मानाभावात् । तच्छब्दस्य सदृशे लक्षणया तत्सदृशस्त्वमिति न्यायविद्भिर्व्याख्यातत्वात् । वेदतात्पर्यस्य न्यायगम्यत्वात् । "यस्तर्केणानुसंधत्त" इति स्मृतेः । न च, लक्षणैव दोषः, परेषामपि पदद्वये लक्षणायाः स्वीकारेण तदपेक्षयैकपदे लक्षणायां लाघवात् । अथवा स इवाचरतीति तदिति तच्छब्दाऽऽचार क्विबन्तात्कर्तरि क्विपि मदुक्तार्थो व्याकरणव्युत्पन्न इति न लक्षणाकल्पनमपि। किञ्च,तत्पदम्प्रथमान्तम्पृथगेवेति कुतो निर्धारितम् । समस्तमेवास्तु तस्मात्त्वन्तत्वमिति । एवं विभक्त्यन्तरेणापि समासोपपत्तिरस्ति विस्तरभयात्तु नोपन्यस्यते। भिन्नपदत्वाऽऽग्रहे वा षष्ठ्याः "सुपांशु लुगित्यादिना सुरादेशो लुग्वा ।" हेत्वर्थको वा तच्छब्दो यत्तदिति हेतावित्यव्ययप्रकरणे पाठात् । त्वं शब्दश्चान्यपर्यायः । 'उतत्वः पश्यन्न ददर्शवाच'-मित्यादौ तथा दर्शनात् । यस्माद् ब्रह्म जगतोरुपादानोपादेयभावो नास्ति तस्मात्त्वमन्य इत्यर्थ : । न च भेदस्य लोकसिद्धत्वान्न तत्र वेदतात्पर्यमिति वाच्यम् । जीवब्रह्मभेदस्याप्रत्यक्षत्वेन स्तोकसिद्धत्वविरहात् । विशेषज्ञान एव वेदतात्पर्यस्योचितत्वात् । अत एव जिज्ञासोपपद्यते । निर्विशेषे जिज्ञासानुपदात् । अत एव किं लक्षणं ब्रह्मेत्याकाङ्क्षायां 'जन्माद्यस्य यत' इति द्वितीयं सूत्रम् । जगत्कारणत्वेन । विशेषेण ब्रह्म निर्द्धारयति । जगत्कारणत्वन्तु ब्रह्मणोऽनुमानसिद्धं श्रुत्यानूद्यते "यतो वा इमानि भूतानि जायन्त" इत्यादिकया । अन्यथा वारुणेस्तद्वाक्यश्रवणादेव ब्रह्मज्ञानसंभवे पञ्चकृत्वो कृत्वो मननानुपपत्तेः । मन्मते तु निर्द्धारिततत्व आचा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

र्यो निदिध्यासनसाक्षात्कृतं ब्रह्म दर्शितवान् । शिष्यस्तु व्युत्पत्ति-विशेषवैधुर्यात्साध्यभेदमुपलभमानोऽन्यथैवानुमितोतिस्मेति मन-नपञ्चकोपपत्तिः । यत्तु तत्त्वौपनिषदम्पुरुषम्पृच्छामीति वाक्यं तदपि नोपनिषद्ग्राह्यत्वम्पुरुषस्य प्रतिपादयति शब्दस्य साक्षात्काराजनकत्वात् । किन्तूपनिषद्बोध्यत्वमेव मननद्वारकमिति न तद्विरोधः । अत एव न्यायवार्तिके प्रत्यक्षानुमानाधिगत वस्तु तत्वान्वाख्यानं शास्त्रधर्म इत्युक्तम् । अत्र वस्तुतत्वाधिगतावाग-मो नोपन्यस्तः, आगमस्यानुमेयप्रामाण्यकत्वात् । यथाहुर्वाचस्पति मिश्राः, यद्यप्यात्मादिप्रमेयमागमिकं तथापि तत्र मूलभूतम्प्रत्यक्ष-मनुमानं वास्तीति प्रत्यक्षानुमानाधिगतेत्युक्तमिति । तस्मात्स-विशेषेश्वरमनन एव वेदतात्पर्याद्विशेषस्य च भेदविषयकत्वाद्भेद-स्तत्वमित्यास्ताम्विस्तरः। ततो न विजुगुप्सत इति शाखान्तर पाठे-ऽपि जुगुप्सां घृणां न करोतीत्यर्थः । घृणा हि परकीयभावनायां भवति । परकीयस्याप्यात्मीयत्वेन भावनायान्तु न घृणा भवतीति लोकसिद्धमेतत् । एतेन सर्वा हि घृणात्मनोऽन्यद्दुष्ट-म्पश्यति । आत्मानमेव त्वत्यन्तविशुद्ध न्निरन्तरम्पश्यतो न घृणा निमित्तमस्तीति भाष्यकृदुक्तम्प्रत्युक्तम् । भवेदेवं यदि भेद एव घृणानिमित्तं स्यात्, भेददृष्टिमेव तु घृणानिमित्तं पश्याम । अघोरकापालिकादीनां परपुरीषभक्षणादावपि घृणाविरहदर्श-नात् । किञ्च भूतेष्वात्मानम्भूतान्यात्मनीति ब्रुवता तात्विक एव भेदः प्रत्याप्यते नाद्वैतमन्यथाऽऽधाराधेयभावानुपपत्तेः । मन्मते तु परस्पराविष्टत्वेन तद्भिन्नेऽपि तद्भावं पश्यतो घृणाविरह उपपद्यत इति किञ्चिदेतत् । इममेवार्थम्फलतो दर्शयन्नाह ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्मिन् सर्व्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।।७।।

यस्मिन्निति– काले यथोक्तात्मनिवेति भाष्यकाराः सर्वाणि भूतान्यात्मैवाभूत् । आत्मव्याप्तत्वेनात्मकत्वप्रकारकभावनाविषयोऽभूत्। "सर्वं समाप्नोऽसि ततोऽसि सर्व" इत्यत्र तथोपपादानात्। व्याप्ति श्चेश्वरस्य सर्वत्र साम्ये नैवास्ति । तारतम्यहेतोरभावात् । अत एव एकत्वं समानतत्वमेव । अनुमननानन्तरम् । पश्यतः मोहस्य रागद्वेषहेतोर्मिथ्या ज्ञानस्य विरहो भवतीत्यत उक्तं को मोह इति । न कोऽपि मोह स्तत्कारणाभावादित्यर्थः । अत एव शोक इति दुःख सामान्याभावोपलक्षणम् । स चात्यन्तिक एव भवतीति साम्यज्ञानस्याव्यभिचरितम्फलम् । एक शब्दस्य समानर्थकत्वात् ।

आत्मौपम्येन सर्वत्र येषां साम्ये स्थितम्मनः ।
पण्डिताः समदर्शिनः ... ... ।।

इत्यादौ साम्यज्ञानस्यैव वस्तु तत्वाच्च । मोक्ष दशायामपि साम्येनावस्थानमेव तत्वभेदः । "निरञ्जनः परमं साम्यमेतीति" श्रुतेः । सजातीयरहितत्व रूपमेकत्वन्तु तदानीन्नास्त्येव । उक्तसाम्यश्रुतिविरोधात् । अभेदमते साम्यांशे परमत्वस्य दुर्वचत्वात् । सोऽश्नुते सर्वान्कामान्सह ब्रम्हणा विपश्चितेति श्रुतिविरोधाच्च अत्र सर्वनियन्तृत्वेन ब्रम्हणः प्राधान्येऽपि भोगगोचरमप्राधान्यमिष्टमेवेति ब्रम्हशब्दा तृतीया । इदमेव तु साम्याँशे परमत्वं यत्सर्व-

CC-0. Nepal Sanskrit Academy Kathmandu Collection.

कामभोगांशे जीवस्य प्राधान्यमतः परमं साम्यमित्युक्तमिति । साम्यशब्दस्य सादृश्यवाचित्वात्सादृश्यस्य च भे दघटितत्वात् । अतएव——

गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ।।

इति वाल्मीकीयवाक्येऽनन्वयालङ्कार इत्यालङ्कारिकाः । केचित्तु कल्पभेदाद्भेदमाश्रित्य सादृश्यमुपपादयन्ति । तन्मतेऽपि भेदघटितमेव सादृश्यमिति नाभिमतक्षतिः । परन्तु गगनभेदस्य कल्पभेदेनाप्यनुपपत्ते स्तन्मतन्न मनोरममिति द्रष्टव्यम् । सर्वत्रैवमुपपत्तावनन्वयोच्छेद प्रसङ्गश्च । न च भेदाघटितमेव सादृश्यमास्ताम् । शब्दैकत्ववादे 'ह्युकालोज्ज्रस्वदीर्घप्लुतः "इत्यादावुकारे स्वप्रतियोगिकसादृश्यदर्शनादिति वाच्यम् । शब्दैकत्वासिद्धे रुत्पत्त्यादि प्रत्ययने भेदस्यैव सिद्धेः । अभेदे सादृश्याङ्गीकारेगवि गोसादृश्यापत्तौ गौरिव गौरिति प्रयोगापत्तिः । तथा च न्यायसूत्रभाष्यविरोधः "अत्यन्तप्रायकैयदेशसाधर्म्यादुपमाना सिद्धिरिति हि सूत्रम् । अत्र भाष्यमत्यन्तसाधर्म्यादुपमानं न सिद्ध्यति न हि भवति यथा गौरेव गौरित्यादि । उकारेऽपि स्वभिन्न सादृश्यमेव शब्दैकत्ववादेऽपि तत्तत्कालौपाधिकम्भेदमाश्रित्य सादृश्योपपत्तेः सुवचनात् । तस्मादेकत्वशब्दः साम्यवाची । अत एव भगद्वाक्यम्——

इहैव तैर्जितः सर्गो येषां साम्ये स्थितम्मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ।। इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपि च

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शन : ।।

इति वदता भगवता मन्त्रद्वयमिदं व्याख्यातप्रायम् । एतेनोभयविधा अप्यात्मैक्यवादिनः परास्ता इति मन्तव्यम् । आत्मानेकतायाः प्रमितत्वात् । तथा च श्रुतिः –"द्वे ब्रह्मणी तत्वतो वेदितव्ये" इति । अत्र द्विशब्दद्विवचनाभ्यामुपस्थापितम् । द्वित्वमपि ब्रह्मणोस्तत्वं तत्प्रतिषेधे कुत स्तत्वज्ञत्वं तेषामत्युपहसनीयमेतत् । अपि च तदेतत्सत्यकाम परमपरञ्च ब्रह्म यदोङ्कार इति श्रुत्या परापरभेदेन ब्रह्मद्वैविद्ध्यमुक्तं केन प्रमाणेन बाध्यते । मुक्तिपर्यन्तं द्वैविध्यम्परेषामप्यनुमतम् । मुक्तौ तु कथमैक्यमसंभवः संवभे वा मुक्तानां परमा गतिरित्यनुपपन्नम् । मोक्ष धर्मे महाभारते –

अनिन्द्रिया निराहारा अनिस्पन्दाः सुगन्धिनः ।
ये च मुक्ता भवन्तीह नरा भरत सत्तम ।।
न तत्राभ्यधिकः कश्चित्सर्वे ते समतेजस : ।
तेषां लक्षणमेनद्धि यच्छ्वेतद्वीपवासिनामिति ।।

अनेन मुक्तिदशायामपि भेदः स्पष्टीकृतो भवति । तत्र तत्र श्रूयमाणानामेकाद्वैताभेदादिशब्दानां सदृशपर्यायत्वम् । "रामसुग्रीवयोरैक्यं देव्येवं समजायत" इत्यादाविव व्याख्येयम् । अन्यथा तमः परे देव एकीभवतीत्यत्रापि जडब्रह्मणोः स्वरुपैक्यापत्तिः । "ब्रह्मभूताविरजस-स्ततो यान्ति पराङ्गति"–

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मित्यादौ भूतशब्द उपमार्थो यथा पितृभूत इति कैपटदर्शनात्भूत-शब्द ऐश्वर्यवचनस्तेन ब्रह्मसाम्यमेवमुक्तावित्युक्तम् । तत श्च जीवेश्वरभेदज्ञानं मोक्षोपाय इत्युक्तम् । अत एव श्रूयते पृथगात्मा-नम्प्रेरितारश्च मत्वा जुष्टस्ततस्तेनामृतत्वमेतीति । अत एव ऋतम्पिवन्ताविति वाक्यं व्याचक्षाण:सूत्रकारो गुहाँप्रविष्टामात्मा //मानौ हि तद्दर्शनादित्येकोपाध्यवच्छिन्नात्मद्वयसद्भावमाह । यतेनोपाधिकृतं द्वैविध्यंमित्यपि प्रत्युक्तं । य आत्मनि तिष्ठन्ति-त्यादावुपाध्यन्तरानपलभाच्च । नन्वेकस्यैव वृक्षस्य स्तम्भ कपाटादिभेददर्शनाद्भेदस्याभेदपूर्वकत्वान्न स्वाभाविकत्वमिति चेन्न । भेद प्रतिषेधरूपो ह्यभेद एव भेदपूर्वक:,अत्यन्तविलक्षणयो देहात्मनो रुपाधिवशेन स्थूलोऽहमित्याद्यभेददर्शनात्पृथिव्या-दीनाञ्चात्यन्तभिन्नानां पञ्चीकरणरुपोपाधिवशेनाभेदप्रतीते श्च भेदस्यैव स्वाभाविकत्वात् । वृक्षस्यैकत्वेप्यवयवानामानकत्वा-त्नाभेदपूर्वकत्वं भेदस्य । नेतरोऽनुपपत्तेर्भेदव्यपदेशाच्चान्य:, उभयेऽपि हि भेदेनैनमधीयत इत्यादिभि: सूत्रैर्भेदस्यैव व्यवस्था-पितत्वात् । तथा च भूपतितत्वनिरुक्तावमास्कं श्लोक:

नास्त्यभेदोऽपवर्गात्प्राक् साम्यमेव ततः श्रुतम् ।
अभावादैक्यकालस्य भेद एवावधार्यतामिति ॥

तस्मात्सर्वज्ञत्व सर्वशक्तित्वान्तर्यामित्वाद्यनन्तगुण: परमात्मा पुरुषार्थरसिकै: सेव्य इति सिद्धम् । अथोक्ता प्रभावस्य परमात्मनो विशिष्ट स्वरूपलक्षणायाह ॥—

// गुहां प्रविष्टावात्मानाविति साधुः स्यात् ।

॥ 'लक्षणायामाह' इति साधुः स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स पर्य्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् । कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥

स उक्त लक्षणः परमात्मा पर्यगात् परितः समन्ताद्गतवान् व्यापकत्वादित्यर्थः । शुक्रमिति नपुंसकनिर्देशः सामान्यविवक्षया । शब्दसामानाधिकरण्याय पुंलिङ्गेनविपरिणम्यते शुक्र इति शुद्ध इत्यर्थः ।शुक्रः शुभ्रः शुचिः श्वेत इति कोशदर्शनात् । अक्षयं अशरीरं इत्यर्थः विपरिणामः पूर्ववत् । अव्रणम् अखण्डः, अस्नाविरम्, स्नाशिरेति भाष्यकाराः । विरं र लयोरभेदाद्विलमेव तेन शिराविलाभ्यां रहितं इत्यर्थः । अनेन कारणशरीरप्रतिषेध उक्तः । अकायमित्यनेन स्थूलशरीरप्रतिशेध इति न पौनरुक्त्यम् । शुद्धम्- अष्टादशविधजीवदोषरहितः । अपापविद्धमिति धर्माधर्मादिदोषरहितमिति भाष्यकाराः । अत्र धर्मराहित्यकथनमुदक्षरधर्मराहित्यस्यैव ततो लाभात् । प्रत्युत धर्मवत्वमेव तेन सूच्यते । अत एव न्यायभाष्यम् । "अधर्म मिथ्याज्ञानप्रमादहान्या धर्मज्ञानसमाधिसम्पदा च विशिष्टमात्मान्तरमीश्वर" इति । यद्यपि नव्यनैयायिका ईश्वरस्य धर्मान्नाभ्युपगच्छन्ति । तथापि तत्प्रौढिवादमात्रम् । उक्त भाष्यस्मृतिपुराणादिविरोधात् ।

तपो मे हृदयं ब्रह्म तपसैव सृजाम्यहम् । इत्यादि दर्शनात् । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते

इत्यादौ भगवच्छब्द प्रयोगात् । ऐश्वर्यधर्मादिषड्गुण पूर्णत्वं हि भगवत्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भाग इतीरणः । इति स्मृतेरिति ।

कविः वेद कर्तृत्वात् । तत्र हेतुः मनीषी सर्वज्ञ इत्यर्थः । परिभूः सर्वेषामुपरि विराजमानः । स्वयम्भूः स्वयमेव भवति । इतरानधीनसत्ताक इत्यर्थः । याथा तथ्यतः यथा तथा भावी यातातथ्यं तस्मात्, अर्थात् द्युपृथिव्यादीन् । व्यदधात् विहितवानिति । तथा च श्रुतिः ।

'धाता यथा पूर्वमकल्पयत्, दिवञ्चपृथिवीञ्चान्तरिक्षमथोस्व' रिति । किमुपादाय विहितवान् इत्याशङ्कायामाह– शाश्वतीभ्यः समाभ्यः इति । नित्याभ्यः सजातीयाभ्यश्च प्रकृतिभ्य इति विशेष्यं पूरणीयम् । समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्य इति भाष्यकाराः । एवमपि याथातथ्यतोऽर्थानित्यनेन कार्याणां सत्यत्वाभिधाने कारणसत्वं सिद्धमेवेति न साधनमपेक्षितम् । अनेन सर्वमिथ्यात्ववादो निरस्तः । ननु वाचारम्भणश्रुत्या कार्यस्य वागालम्वनमात्रतया कारणमेव सत्यमित्युपदेशान्नेह नानेति तदन्य निषेधाच्च जगन्मिथ्यात्वम्प्रतीयत इति चेन्न । स्वमनीषामात्रकल्पितत्वेनास्यार्थस्य श्रुत्यप्रतिपन्नत्वात् । तथा ह्येक विज्ञानेन सर्वविज्ञानप्रतिज्ञायां कथमेकविज्ञानात्सर्वविज्ञानमित्याक्षेप परिहाराय यथा सोम्येकेन मृत्पिण्डेनेत्यादिना मृदारब्धघटशरावादिकं सर्वं ज्ञातं यथा भवति तथेत्युक्तम् । तत्रापि नामान्तराकारान्तरावच्छिन्नघटादेः कथं मृत्पिण्डज्ञानेन ज्ञानमित्याक्षेपे घटेनोदकमानयेति शब्दार्थ निबन्धनव्यवहारेण नामधेयमारभ्यत इत्येतावता कार्यस्य द्रव्यान्तरत्वयोगात् घटादिकार्यं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृद्द्रव्यतथैव सत्य न्न द्रव्यान्तरमित्यारम्भणशब्दघटितश्रुत्या कार्यकारणयोरेकद्रव्यत्वमात्रप्रतिपादनात् । नेह नानेति श्रुत्याचोपादानशरीरब्रह्मकार्यतयैकरूपत्वाद्, द्वैविध्यं नास्तीति प्रतिपादनादेक (कं) चैवानुद्रष्टव्यमित्युत्तरत्र श्रवणात् । इह प्रपञ्चे ब्रह्मणि वा नाना नास्तीत्युक्ते हि न कस्यापि मिथ्यात्वप्रतीतिः । अथात आदेशो नेति नेतीत्यादि श्रुतिस्तु द्वे वाव ब्रह्मणो रूपे मूर्तञ्चामूर्तञ्चेति प्रस्तुतमूर्तामूर्तवैशिष्ट्यमात्रं न ब्रह्मणो धर्मः । किन्तु निर्विकारत्वमित्याह– नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतिस्तु परमेश्वरतुल्यो द्रष्टानान्य इत्याह । तस्मान्न क्वापि श्रुतिषु मिथ्यात्ववादोऽस्ति । न तत्सम इति सदृश व्यक्त्यन्तर निषेधः । न च दृश्यते न मिथ्यात्वसिद्धिः सोपाधिकेनतेन मिथ्यात्वस्यासिद्धेः अन्यथा ह्यदृश्यत्वेन ब्रह्मण इव नरविषाणादेरपि सिद्धिप्रसङ्गः । 'असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वर' मित्यादि जगदसत्यत्ववादस्य निन्दितत्वाच्च । सूत्रकारश्च– हेयत्वावचनाच्चेत्यनेनात्मातिरिक्तस्य हेयत्वमर्थतो वदन्मिथ्यात्वस्य न श्रुतिप्रतिपन्नत्वमिति सूचयति । तस्मात्सिद्धञ्जगत्सत्यत्वमिति । अथेयता प्रबन्धेनोक्तस्वरूपमात्मानं ज्ञात्वा तदर्पणबुद्ध्या कर्माणि कुर्वीतेति प्रतिपादितम् । तत्र यः कश्चिद्यथोक्तलक्षणमात्मानं ज्ञात्वा ज्ञाननिष्ठतैव केवलम्मोक्षहेतुरिति मन्वानो वेदविहितानि कर्माणि त्यजति । यो वा यथोक्तमात्मानं जानन्ननीश्वरं वा जगन्मन्यमानो वेदोक्तानि कर्माण्येव तत्तत्फलेच्छायानुतिष्ठति, तावुभौ न ज्ञानयोगिनौ नापि कर्मयोगिनौ ज्ञानकर्मणोः फलभेदा दत एकविषयत्वेनैक फलस्वरूपं साहित्यमुपदिशति मन्त्रेण ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्याया रताः ॥९॥
अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया इति शुश्रुम
धीराणां ये नस्तद्विचचक्षिरे ॥१०॥
विद्याञ्चाविद्याञ्च यस्तद्वेदोभय ँसह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥११॥

अन्धन्तमः, अदर्शनात्मकं तम इति भाष्यकृतः। तर्ककुतूहले तु 'अन्धन्तमः संसाररूपम्प्रविशन्ति न तु मोक्षं लभन्ते इति स्थितम्। के के येऽविद्यां विद्याभिन्नां कर्मरूपामुपासते केवलकर्मनिष्ठा इत्यर्थः। ततो भूय इव बहुतरमिव ते तमः प्रविशन्ति। येऽपि विद्यायां तत्वज्ञान मात्रे रता स्तत्परा इत्यर्थः। भगवत्पादास्तु– विद्यायां देवताज्ञाने रता इत्यर्थं इत्याहुः। तन्मन्दम्। विद्याशब्दस्य ज्ञान सामान्यवाचिनो देवताज्ञानरूपविशे(ष)परत्वे मानाभावात्। प्रकरणादिरूपसहकारेण तत्वज्ञानपरताया एव लाभात्। तर्क-तूहलकारास्तुविद्यायां साकारोपासनायामिति व्याचख्युः। तदप्य-सत्। निराकारोपासनाया असिद्धेः। "अचिन्त्यस्याद्वितीयस्य निष्कलस्याऽशरीरिणः। उपासकानां कायार्थं ब्रह्मणो रूप-कल्पना" इति श्रुते रुपासनार्थं रूपस्यैव कल्पनीयत्वात्। कल्पनापि नित्यतद्रूपानुमानमेवं न तु काल्पनिकं तद्रूप मिथ्येति युक्तम्।

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।

इति भगवतै साकारताया स्तुतत्वात्। विभूत्यध्याये ध्येयरूपाण्युपदिशता निराकारोपासनाया निराकृतप्रायत्वात्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स चाकारो यद्यपि केषाञ्चित्प्रत्यक्षोऽपि तथापि न सर्वेषामित्यनुमानमुक्तम् । यद्यपि विष्णोस्तु त्रीणिरूपाणि कृष्णो रामः कपिल इत्यादि श्रुतिर्माध्वभाष्यादिषूपलभ्यते । तथापि श्रुत्यनुपलंभिनामनुमानमेव शरणम् । नित्यश्चास्याकार तदुक्तं वाराहपुराणे–

सर्वे नित्याः शाश्वताश्च देहा स्तस्य परात्मन :।।
हानोपादानरहिता नैव प्रकृतिजाः क्वचित् ।।

इति प्रतिपादितं प्रागेव । अनेनेच्छामयत्वमाकारस्य ध्वनितम् । तथोक्तं भारते ––

माया ह्येषा मयासृष्टा यन्मां पश्यति नारद । इति ।

एवं रूपं मां पश्यतु लोक इत्याकारकेच्छा हि माया । इच्छायाश्च नित्यत्वेन नित्यमेव तच्छरीरमिति सिद्धम् । प्रकृतमनुसरामः, येऽविद्यायां तत्वज्ञान एव रता स्ते भूय इवाधिकतरमिव तमः प्रविशन्ति । अयमर्थं, ज्ञाननिष्ठैः खलु स्ववर्णाश्रमविहितकर्मत्यागःक्रियतेऽत स्तेषांच शूकरादिशरीराण्येव स्युः कर्मनिष्ठायां तु प्रत्यवायानुदयात्पुण्यवशेन देवादि शरीरभोगानन्तरं कर्मक्षयेसति श्वादिशरीराणीति कर्मापेक्षया विद्याया एव निकृष्टं फलमिति। विद्यायाः कर्मणश्च फलभेदमाह । अन्य देवेति "विद्यया देवलोक" इति श्रुते,'कर्मणापितृलोक'इति श्रुते श्चेति। इतिशुश्रुम धीराणांमितिधीमतां ज्ञानताँ वचनमिति शेषः।ये आचार्या नोऽस्मभ्यन्तत्कर्मज्ञानञ्च विच चक्षिरे व्याख्यातवन्तःतेषामयमागमः पारम्पर्यागतइत्यर्थः।अतो य स्तदुभयं सह। एकविषयत्वे नैकफलत्वरूपसाहित्यविशिष्टं वेद। ज्ञानवानसोऽयंविद्याया कर्मणा मृत्युं कर्म-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

फलभूतं संसारं वेद। ज्ञातवान् सोऽयमविद्यया कर्मणा मृत्युं कर्मफलभूतं संसारं तीर्त्वा विद्यया तत्वज्ञानेन अमृतंमोक्षमश्नुते प्राप्नोति अनुभवतीति यावत् अनेन ज्ञानकर्मणोः समुच्चयो दर्शितःस्मृतिश्च

उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणाङ्गतिः ।
तथैव ज्ञानकर्माभ्यां प्राप्यते शाश्वती गति इति
ज्ञानं प्रधानं न च कर्महीनं कर्मप्रधानं त तु बुद्धिहीनम् ।
तस्माद् द्वयोरेव भवेत्प्रसिद्धिर्नह्येकपक्षो विहगः प्रयाति ।।

इति भारतोक्ते श्च ।

विष्णुपुराणेऽपि–

तस्मात्तत्प्राप्तये यत्नः कर्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामते ।। इति ।

अत्र पक्षद्वयदृष्टान्तेनोभयोः स्वातन्त्रेणैकफलत्वं दर्शितम् । तेन फलवत्सन्निधाफलं तदङ्गमिति नात्र प्रवर्तते । उभयोरपि भगवत्प्रसादैकफलत्वेनान्यतरस्य विनिगन्तुमशक्यत्वात् । 'तमेव विदित्वेति' श्रुतिबोधितो मुक्तितत्वज्ञानयोः कार्यकारणभाव एव विनिगमक इति चेत् "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" "जनकोह वैदेहः" इत्यादी श्रुतिस्मृद्धि बोधितो मुक्तिकर्मणोः कार्यकारणभाव एव निगमक इति तुल्यम् । परस्परव्यभिचारवारणायाऽव्यवहितोन्तरत्वादिनिवेशे गौरवम् । तस्माद् भगवत्प्रसादत्वे नैव कारणत्वम् । स्वजनकोपायविशेषत्वञ्च कारणतावच्छेदकः सम्बन्धः उपायश्चोयासीतेति विधिबोधितं तत्वज्ञानानन्तरभाव्युपासनमेव । आत्माद्रष्टव्य इत्यादि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विधिबोधिते तु तत्वज्ञानमुपासनाविधिविषेशः । यत्र तु तत्वज्ञानविरहेऽपि भगवत्प्रसादमात्रेण मोक्ष स्तत्र भगवत्प्रतिपत्ति रेवोपायः ।

मामेव ये प्रपद्यन्ते मायामेतान्तरन्ति ते । इत्युक्ते :।

यत्र तद्विरहेऽपि मोक्षस्तत्र निरन्तर भाव एवोपाय इति । विशेष इत्युक्तम् । तत्वज्ञाने सति नान्यत्साधनमपेक्षितमिति तु श्रद्धाजाडयं ग्रान्थिकानाम् । नहि शतेनाप्याप्तोपदेशैर्नेपालेश्वरत्वज्ञानवतामस्माकं तस्माद्योगक्षेम लाभोऽस्ति विनाराधनमिति युक्तमुत्पश्यामः । अथामृतमश्नुत इत्यनेन मोक्षरूपं फलमुपदिष्टं तदेव कीदृशमित्याकाङ्क्षायां मतान्तरनिरास द्वाराऽभिमतं मोक्षस्वरूपमुपदिशति मन्त्रत्रयेण ।।

अन्धन्तमः प्रविशन्ति येऽसम्भूतिमुपासते ।
ततो भूय इवते तमो य उ सम्भूत्या ꣳ रताः ।।१२।।
अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ।।१३।।
सम्भूतिञ्च विनाशञ्च यस्तद्वेदो भय ꣳ सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ।।१४।।

अयमर्थः– ये चार्वाकादयःअसम्भूतिं आत्मनाशं तान्येवानुविनश्यतीत्यादि श्रुतिबोधितम्मोक्षस्वरूपं उपासते जानन्ति । दुःख हेतुत्वेन शरीरादेरिवात्मनोऽपि हेयत्वात् । शरीरादि व्यतिरेकेणात्मनि दुःखानुदयवशात्मव्यतिरेकेण शरीरादावपि दुःखानुदयात् । तथोक्तम्—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न तैर्विना दुःखहेतुरात्मा चे (चै) तेऽपि तादृशाः ।
निर्दोषं द्वयमप्येवं वैराग्यञ्चेद्वयो स्मृत (म्) इति ॥

एवमात्मनाशम्मोक्षं जानन्तोऽन्धन्तमः प्रविशन्ति नरकादिदुःखभागिनो भवन्ति । तत्वानभिज्ञत्वादिति भावः । न ह्यात्मनाशः पुरुषार्थः, तदर्थमप्रवृत्तेः, अनिष्टोपरमार्थमेव हि प्रवर्तते दुःखं । मे मा भूदिति । तान्येवानुविनश्यतीति तु दुःखनाशाभिप्रायेणोक्तम् । अन्यथा ऽ विनाशी वा अरे अयमात्मानुच्छित्तिधर्मेति श्रुतिविरोधात् । असम्भूतिपदस्य विनाशपरत्वन्तु विनाशेन मृत्युं तीर्त्वेत्यनेनैव व्याख्यातं ये पुनः सम्भूत्याम् अविद्यानिवृत्त्या जीवस्य ब्रह्मसंपत्तौ रताः ब्रह्मैवसन् ब्रह्माप्येतीत्यादि श्रुत्याकलनात् ते ततः पूर्वापेक्षया भूयः बहुतरमिव तमः प्रविशन्ति । ते खल्वेवमुत्प्रेक्षन्ते । नित्यप्राप्तस्यापि ब्रह्मणोऽविद्यावशादप्राप्ताभिमानादविद्या + निवृत्तौ प्राप्त त्वोपचारः कण्ठचामीकरवत् । द्विविधं हीप्सितं भवति किञ्चिदप्राप्तं यथा ग्रामादि । किञ्चित्पुनः प्राप्तमपि विभ्रमवशादप्राप्तमिवावगतम् । यथा स्वग्रीवावनद्धं ग्रैवेयकादि । जिहासितमपि द्विविधं, किञ्चिदहीनमेव यथा बलयितचरणः फणी । किञ्चित्पुनर्हीनमेव यथा चरणाभरणे नूपुरे समारोपितः फणीति । एवमविद्यासमारोपित जीवभावे ब्रह्मण्यानन्दमये वस्तुतः शोकादिरहिते समारोपनिबन्धनस्तत्वमसीति वाक्यार्थज्ञानात्साक्षाकारपर्यन्तान्निवर्तते तन्निवृत्तौ च प्राप्तमप्यानन्दरूपमप्राप्तमिव प्राप्तं भवति । त्यक्तमेव शोकादिकमत्यक्तमिवारोपितं त्यक्तं भवतीति

+ अधिकमिदमेकमविद्यापदं प्रतिभाति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदेतदयुक्तम् । जीवब्रह्मणोर्भेदस्य प्रामाणिकत्वात् । अविद्या-मूलत्वे मानाभावात् । ब्रह्मण एवाऽविद्यकत्वापत्तेश्च । किञ्च अविद्या कल्पिता नवा; कल्पितेति चेत्तदनादित्वमिति चेत् अविद्या कल्पिता नवा; कल्पितेति चेत्तदनादित्व सिद्धान्तभङ्गः। कल्पनैव हि सृष्टिः स्वकल्पने मूलान्तरानपेक्षत्वमानादित्वमिति चेत् तर्हि विमतमविद्याऽस्तित्वमकल्पितं स्यात्स्वतः सिद्धत्वाद् ब्रह्मास्तित्ववत् । अथ विमता ऽ विद्या न कल्पिता भावत्वे सत्यनु-त्पन्नत्वात् । ब्रह्मवदिति चेत्तर्हि विमतेयमबाधार्हा । भावत्वे सत्यनादित्वादिति प्रतिरोधः ।

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।

इत्याप्रमाणै स्तस्या अनादित्वमिति चेत्तर्हि नित्यासतत-विक्रिया "अष्टरूपामजांध्रुवाम्" इत्यादिभिरबाध्यत्वमपि किं नस्यात् । अनादित्वकल्पितमिति चेत्तर्ह्युत्पत्तिरेवाभिमता स्यात् । उभयमपि कल्पितमिति चेत्तर्हि घटाविद्ययोरविशेषः तदुत्पत्तिरपि कल्पितेति चेत् केन कल्पिता अविद्ययैवेति चेन्न कल्पनाधीनसिद्धे-स्तस्याः स्वोत्पत्तिकल्पनाहेतुत्वात् । इत्थञ्च तदभिमताया अविद्याया एवासिद्धे स्तन्निवृत्तौ ब्रह्मभाव इति तुच्छम् । साम्य-श्रुतीनामन्यथानुपपत्तेश्च । अन्येदेवाहुरित्यादि सम्भवाद् ब्रह्मरूपादन्यदेव मोक्षमाहुः "निरञ्जनः परमं साम्यमेतीति" श्रुतेः । अस्य महिमानमिति वीतशोक इति श्रुतेश्चेत्यर्थः असं-भवात् । आत्मनाशादप्यन्यदेवमोक्षस्वरूपमनिष्टोपरमलक्षण-माहुः । इति शुश्रुम धीराणाम् वेदतात्पर्यज्ञानवतामेतद्वाक्यं श्रुतवन्तो वयमित्यर्थः । अथवा उक्तमर्थं शाब्दयामः श्रोतव्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यत्र शृणोतेः शाब्दज्ञाने निरूढलाक्षणिकत्वस्वीकारात् । ये धीराः,नः,अस्माकम् तत् मोक्षरूपम् विचचक्षिरे विशेषेणाऽऽख्यातवन्तः क स्तर्हि तान्येवानुविनश्यति । ब्रह्मैव सत् । ब्रह्माप्येतीत्यादि श्रुतीनामर्थ इत्यत आह सम्भूतिमित्यादि उक्त लक्षणमुभयं यः सहवेद वेदतात्पर्याविषयत्वरूपसाहित्यविशिष्टं वेद । यद्वा दुःखनिवृत्ति-ब्रह्मसाम्यात्तिरूपमुभयम् । सह वेद एकजीवनिष्टत्वरूपसाहित्यविशिष्टं वेदेत्यर्थः । सोऽश्नुते सर्वान्कामान्सह ब्रह्मणेति श्रुतेरात्मनाशब्रह्मैक्ययोरयोगात् । विनाशेन सकलक्लेशध्वंशेन मृत्युं संसारबन्धनं तीर्त्वा अमृतं ब्रह्मताम श्रुते प्राप्नोतीति । ननु नेह नानाऽस्ति किञ्चिनेत्यनेन भेदनिषेधादेतदनुरोधेन सर्वासां श्रुतीनां नेयत्वाज्जीवब्रह्मणेभेदाभावान्नैवमिति चेत् मैवम् । नानाशब्दस्य भेदार्थकत्वे मानाभावात् । "पृथग्विनान्तरेणर्ते हि रुङ्नाना च वर्जन" इति कोशदर्शनान्नानेत्यनेकविनार्थयोरित्यव्ययप्रकरणे पाठाच्च भेदनियतसंयोगादिरूपसाहित्याभावरूपपार्थक्यस्यैव नानापदार्थत्वात् । अन्यथा नञ्पदस्यैव भेदार्थकत्वात्तदर्थ एव नाञ प्रत्ययोपपत्तौ सहेत्यंशवैयर्थ्यापातात् । अनिर्दिष्टार्थाः प्रत्ययाःस्वार्थे भवन्तीति न्यायात् । एतेन नानेति नञ् शब्दःस्वार्थिकनाञ् प्रत्ययान्ततया भेदरूपपार्थक्यार्थकः भेदे च निषेधाधिकरणत्वेनोपस्थितस्य ब्रह्मण एव प्रतियोगित्वं । ब्रह्मणि ब्रह्मभिन्नं नास्तीति । ननु निषेध्यत्वेनोपस्थितस्य प्रपञ्चस्य दृश्यभिन्नं दृश्यं ब्रह्मणि नास्तीत्यर्थे दृश्यभिन्नं दृश्यमित्यंशस्य वाधितत्वात् । एवं बृहदारण्यकस्थेऽपि वाक्ये बोध्यमिति परास्तम् । न च स्वार्थिकप्रत्ययान्तत्वं भेदेयान-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मिति वाच्यम् । "विनञ्भ्यान्नानाञौ नसह" इति सूत्रे हि न सहेत्यस्य प्रत्ययार्थत्वेनञश्च प्रकृतिभूतस्याभावार्थकत्वे द्वौ नञौ प्रकृतमर्थं गमयत इति न्यायेन साहित्यमेव नानापदार्थः स्यादित्याशङ्क्य न सहेति नञ एवार्थो लक्षणाश्रयणात् । नाञ्-प्रत्ययस्तु साहित्या भावरूप एव लक्ष्ये नञपदार्थे इति महाभाष्य-कारैरुक्तम् । तथा च तत्सिद्धान्त ग्रन्थे पठयते । नैष दोषः, नायं प्रत्ययार्थः किं तर्हि प्रकृत्यर्थविशेषणमेतत् । विनञित्येताभ्याम-सहवाचिभ्यान्नानाञौ भवत इति व्याख्यातञ्चकय्यटेन । लोकप्रसिद्धार्थानां शब्दानामिह साधुत्वान्व्याख्यानाल्लोके नाना-शब्दस्य पृथग्भावाभिधायित्वा न्न सहेति प्रकृत्यर्थनिर्देश इति । एतेनभेदरूपपार्थक्यार्थत्वादित्यपि परास्तम्। उक्तदोषान् कैयटेनापि प्रोक्तार्थस्य विवक्षितत्वात् । 'नाना विष्णुम्मोक्षदोनान्यदेव' इत्यादावपि विष्णुभिन्नो मोक्षदातानेत्यर्थ स्तात्पर्यसिद्धः । वा-च्यार्थस्तु विष्णुं विना मोक्षदाता नेत्येव । वस्तुतो नानाशब्दस्य नभेदोऽर्थः, अन्यदेव इत्यत्रान्य शब्दवैयर्थ्यात् । विष्णु भिन्नोऽन्य-देवोमोक्षदो नेत्यत्रान्यपदार्थैकदेशे ऽन्यो ऽन्याभावेऽपि विष्णोरेव प्रतियोगित्वेनान्वयस्य वाच्यत्वात् । अन्यथा विष्णुभिन्नस्यापि मोक्षदातृत्वप्रसङ्गात् । विष्णोरेव मोक्ष दातृत्वव्यवच्छेदप्रसङ्गा-च्च । यत्तु नेह नानास्ति किञ्चन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति । नात्र काचन भिदास्ति । अत्र भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्योर्मृत्युमाप्नोतीत्यादि श्रुत्यन्तरैक्य-वाक्यतया नानाशब्दो भेदपर एवेति । तन्न, भेदनिषेधेऽपि भिन्न निषेधस्यासिद्धेः प्रत्युत नानाशब्दस्य नानात्वमर्थमुपादायानेक-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वरूपं तन्निषिद्ध्यत इति व्याख्यानस्यैवावकाशसिद्धेः । अनेकवाचकनानाशब्दस्य भावप्रधानत्वादनेकत्वपरत्वे लक्षणा स्यादिति चेन्नैषदोषः, श्रुत्यन्तरसंवादित्वात् । त्वन्मतेऽपि नानाशब्दस्य लक्षणयैव भिन्नपरताया वक्तव्यत्वात् । धर्मिलक्षणायां प्रमाणविरहस्तु बाधिकः श्रुत्यन्तरीयभिरापदेऽपि भिन्नलक्षणाया आवश्यकत्वात् । क इदानीं श्रुतेरर्थ इति चेत् । अत्र तर्ककुतूहलकाराः-- 'इह ब्रह्मणि विद्यमानं नाना अनेकं वस्तुज्ञानेच्छादि रूपं' । किञ्च न अनिर्वचनीयं नास्ति विशिष्य निर्वक्तुमशक्यं हि वस्तु किञ्चिदिति व्यवहरन्ति ।

नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे ।'

कस्मै चिद्विश्वतस्त्विषे । कस्मैचित्कपटाय कैटभरिपूरः पीठ दीर्घालयामित्यादौ तथा दर्शनात् । यद्यपि पराभिमतमिथ्यात्व रूपमनिर्वाच्यत्वमभिप्रेत्य नैते प्रयोगा, स्तथापि किञ्चिदंशसाम्येन दोषाभावः । भवतु वा तादृशमेवानिर्वाच्यत्व मत्रार्थस्तथा चानिर्वाच्य द्वैत निषेधपरमेवेदं वाक्यम् । अत एव नात्र काचनभिदा स्तीत्यत्राप्यनिर्वचनीयाभिदा नास्ति, किंतु ब्रह्मणि विद्यमानो भेदः पारमार्थिक एव । तथा चार्थात्प्रतियोगितामिथ्यात्व लाभः । अस्तु वा तच्छ्रुत्येकवाक्यतया नानाशब्दस्य भिदार्थे लक्षणा किञ्चनेत्यत्राव्ययविशेषणत्वात् क्लीवत्वम् । तथा चानिर्वाच्यभेदनिषेधएवार्थः । अत एव य इह नानेव पश्यति अत्र भिदामिव मन्यमान इत्यत्र वा वास्तवं भेदं यः पश्यति स संसारं नोल्लङ्घयति तत्वानभिज्ञत्वादित्यर्थकमिवपदंसंगच्छते । आरोपितत्वस्यापि संभावनारूपस्येव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पदार्थत्वात् । यदि तु नानापदस्य भिदापरत्वेऽपि तदर्थस्य प्रतियोगितया नञर्था भावान्वयो न स्यादिति विभाव्यते तदाऽस्तु नानाशब्दस्य भिन्नपरत्वमेव । लक्षणसाम्येऽपि मानान्तरसंवादविगानयोरेव विनिगमकत्वात् । अत्र भिक्षामिवेति श्रुत्यन्तरेऽपि अनिर्वाच्यभेदनिषेध एवार्थः लक्षणायां प्रयोजनाभावादद्वैतनिषेधस्य तावतैव सिद्धेः। यद्वा इह ब्रह्मणि विद्यमानं ज्ञानेच्छादिकं नाना अनेकं स्वसजातीयप्रागभावसमानाधिकरणं नास्ति किं त्वेकमव नित्यत्वादितिभावः, न च ज्ञानेच्छादीनामनुपस्थितत्वम् । प्राणस्य प्राणमिति पूर्वार्द्धे प्राणादिनियामकत्वेन तेषां प्रक्रान्तत्वात् । ननु, मृत्योः स मृत्युमाप्नोतीति वाक्यशेषेण नानात्वदर्शनस्य संसारहेतुत्वाभिधानात्तस्यैव मिथ्याज्ञानत्वं लभ्यते । संसारहेतोर्मिथ्याज्ञानत्वे सर्वेषामविवादात् । तदेव नानात्वं निषेध्यत्वेन तात्पर्यविषयः । तथा चासङ्गतिः न हि न्यायेन ये परमात्मन्यनित्यज्ञानवत्वज्ञानं मिथ्याज्ञानम् किं पुनर्मिथ्याज्ञानमनात्मन्यात्मग्रहो ऽ हमस्मीति मोहोऽहङ्कारइति न्यायभाष्यवार्तिकोक्तेः। "अनित्या शुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्ये" ति पातञ्जलसूत्राच्चेति चेत्तर्हि नानाविधं किञ्चन वस्तु ब्रह्मणि नास्ति । तथा च जगद् ब्रह्मण्यध्यस्तमिति नशङ्कनीयमितिभावः । ब्रह्मसत्ताप्रयुक्तसत्ताकत्वव्यावृत्त्या स्वतन्त्रसत्तावत्त्वभ्य बाध काभावेन बोधितत्वादध्यस्तत्वाभाव पर्यवसानात् । अथवा मनसैवाऽनुद्रष्टव्यमिति श्रुत्या मनोमात्र २१ रकणकज्ञानगोचरत्वप्रतिपादनात्– प्रत्यक्षानुमानादिकं व्यवच्छिद्यते तदेतत्स्पष्टयति । नेह नानेति प्रत्यक्षानुमानादिकं नात्मनि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रवर्तत इत्यर्थः। ननु बहिरिन्द्रियमात्मनि मा नामप्रवर्तिष्ट शब्दानुमानादिकं तु प्रवर्तत एवेत्याशङ्क्याऽऽह 'मृत्योः स मृत्युमाप्नोतीत्यादि' य आत्मनि शब्दानुमानादिप्रवृत्तिं मन्यते। स संसारमेव प्रतिपद्यते मोक्षहेतुज्ञानजनकत्वस्यैव व्यवच्छेद्यत्वात्। शब्दादिज्ञानसत्वेऽपि तस्य साक्षात्कारानात्मकतयाऽनुपयुक्तत्वात् यद्वा इह ब्रह्मसाक्षात्कारे। किञ्चन विषयो नास्ति। तेन समूहालम्बनस्य सविकल्पकस्य च मोक्षहेतुत्वव्यवच्छेदः। तदाह मृत्योः समृत्युमित्यादि, तस्माद्भेदस्य प्रामाणिकत्वादनिष्टोपरमः साम्यलाभश्च मोक्ष इतितत्त्वम्। ननु "तदत्यन्तविमोक्षो ऽपवर्गः" इति न्यायसूत्रेऽनिष्टोपरमस्यैव मोक्षत्वोपदेशाद् ब्रह्मसाम्यं न मोक्षपदार्थ इति चेन्न। ब्रह्मसाम्यस्यार्थसिद्धत्वात्। अत एव एतामवस्थामपर्यन्तामपवर्गं वेदयन्ते ऽपवर्गविदः तदभयमजरममृत्युपदं ब्रह्म क्षेमप्राप्तिरिति न्यायभाष्यं संगच्छते। ब्रह्म क्षेम प्राप्ते ब्रह्म साम्य प्राप्तेश्च समानार्थकत्वादितिदिक्। इदानीं यावज्जीवमुक्तलक्षणकर्मनिष्ठस्य प्राणशरीरवियोगे विशेषप्रतिपत्तिमाह—

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम्।
ॐ क्रतो स्मर कृत ꣳ स्मर क्रतो स्मर कृतꣳ स्मर ॥१५॥

अथ मरणानन्तरं वायुः प्राणो ऽध्यात्मपरिच्छेदं हि सर्वात्मकमधि दैवात्मानमनिलं सूत्रात्मकं सदमृतं शाश्वतंपदं प्रतिपद्यतामिति वाक्यशेष :। लिङ्गशरीरमिदं प्राणप्रधानं ज्ञानकर्म संस्कृतमुत्क्रामत्विति व्याख्यातारः। इदं दृश्यमानं स्थूलं शरीरम्। अग्नौ हुतं भस्मान्तं भूयादिति वाक्यशेषः। ॐ क्रतो यज्ञात्मक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परमात्मन् क्रतुशब्दस्य यज्ञार्थत्वात् । ॐशब्दस्य परमात्मवाचकत्वात्तयोरभेदान्वयात् । तस्य वाचकः प्रणव इति पातञ्जलसूत्रदर्शनात् । स्मर अनुग्राह्यत्वेन मामिति शेषः । कृतं स्मरेति यन्मया बाल्यप्रभृत्यनुष्ठितं त्वदर्पणबुद्ध्या कर्म तदपि स्मर तत्फलप्रधानस्य त्वदधीनत्वादिति प्रार्थना । पुनः तद्वचनमादरार्थमिति व्याख्यातारः । अत्र शरीरभस्मान्तत्वं ब्रुवता चतुर्थाश्रमस्यानावश्यकत्वम् । गृहस्थाश्रमस्य प्राशस्त्यं वा ध्वनितम् । यतिशरीरस्य भस्मान्तत्वानुपपत्तेरिति । अथोत्क्रान्तिमार्गम्प्रार्थयते ।

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि । विद्वान् युयो ध्यस्मञ्जुहुराणमेनो भूमिष्ठान्ते नम उक्तिं विधेम ॥१६॥

हे अग्ने सुपथा शोभनेन मार्गेण देवयानेनेत्यर्थः । अनेन दक्षिणमार्गव्यवच्छेदः, तन्मार्गे पुनरागमप्रसङ्गात् । अस्मान्नय तद्विष्णोः परमंपदमिति वाक्यशेषः कस्मै प्रयोजनाय राये धनाय कर्मफलभोगायेत्यर्थ इति व्याख्यातारः । कर्मफलस्येश्वरे समर्पितत्वात्कथमिदानीं तत्प्रार्थ्यते । नैष दोषः ईश्वरे समर्पितं कर्मफलमीश्वर प्राप्तिरूपमीश्वरानुग्रहान्तेनैव भोक्तव्यमतः प्रार्थ्यते । सोऽश्नुते सर्वान्कामान्सह ब्रह्मणेति श्रुतेः । हे देव सर्वज्ञ विश्वानि सर्वाणि वयुनानि ज्ञानात्मकानि कर्माणि विद्वान् जानन्नसि । भगवदाराधनलक्षणं कर्मैव ज्ञानपदार्थो न तु बुद्धि गुणमात्रम् । तदुक्तं गीतासु—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ।।
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःख शोकानुदर्शनम् ।।
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ।।
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्त देशसेवित्वमरतिर्जनसंसदि ।।
अध्यात्मज्ञाननित्यत्वं तत्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथेति ।

अत्र ज्ञायतेऽनेनेति ज्ञानं करणे ल्युट्ज्ञेयस्य वक्ष्यमाणत्वात्त-द्विषयज्ञानसाधनान्यमानित्वादीनि पञ्चदशतत्वज्ञानानन्तरं तमपि चानन्य योगेन भक्तिरव्यभिचारिणीत्यादीनि पञ्च ।

आत्मारामाश्चमुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ।

इति स्मृतेरिति द्रष्टव्यम् । अनेन एकमेवाद्वितीयमित्या दि वाक्यकुव्याख्यानकल्पितमद्वैतज्ञानम्परेषामज्ञानमेवेत्युक्तम् । अज्ञानं यदतोऽन्यथेत्यनेन तत्प्रतिषेधात् । एकादिपदानां सजाती-यादिभेदे लक्षणाभ्युपगमस्य दुष्टत्वाच्च । अद्वितीयपदेऽपि न बहुव्रीहिः कर्मधारयापेक्षया जघन्यत्वात् । ब्रह्मव्यक्तिनानात्व प्रतिषेधेनैव तत्साफल्याच्च । न हि राजा चेदद्वितीयो जनाना-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मिथ्यात्वेन भवितव्यम् । न तत्समश्चाभ्यधिकश्च दृश्यत इत्यनेन समाधिकमात्रनिषेधात् । सर्वोत्कृष्टत्वेन भगवतः सर्वाराध्यत्वन्तत्प्रसादाच्च सर्वपुरूषार्थलाभ इति सर्ववेदान्तार्थप्रतिपादने किन्नो हीयते । यतो निर्मूलातिक्लिष्टान्वीक्षिकीविरुद्धा सर्वाद्वैत कुसृष्टिरारभ्यते । यदुक्ततं पद्मपुराणे--

मायावादमसच्छास्त्रं प्रच्छन्तं बौद्धमेव च ।
परात्मजीवयोरैक्यम्मायात्र प्रतिपाद्यते ।। इति ।

एतेन--

दग्धाखिलाधिकारत्वाद् ब्रह्मज्ञानाग्निना मुनिः ।
वर्तमानः श्रुतेर्मूर्ध्नि नैवस्याद्वेदकिङ्करः ।।

इत्याद्यलेपकवादोऽपि निरस्तः । प्रपञ्चस्य मिथ्यात्वे स्थूलत्वादेरपि तदन्तर्गतत्वादस्थूलमित्यादिनिषेधानर्थक्यञ्चेत्यलमप्रकृतेन । प्रकृतमनुसरामः, अस्मत् अस्मत्तः जुहुराणां कुटिलवचनात्मकं एनः पापम् युयोधि वियोजय विनाशयेति यावत् । ततो वयं शुद्धाः सन्त इष्टम्प्राक्ष्या (प्स्या)म इति भाष्यकाराः । जुहुराणशब्देनाग्निः परिगृह्यते । जुहुराणोऽपि चाध्वर्यौ तथोक्तो-जातवेदसीति मेदिनीकारकोषदर्शनात् । स एव दाहवसेन दुःखजनकत्वादेनः पापं तद्वियोजयेति पूर्ववत् । पुनः पुनः शरीरं संबन्धे भस्मान्ततायाः अवश्यम्भावाद्दाहजनिततापस्यातिदुस्सहत्वेन तत्प्रयोजकपापनाशस्य प्रार्थनीयत्वादितिभावः । अस्यान्त्ववस्थायां त्वत्परिचरणादेरयोगात् । भूमिष्ठां बहुतरां ते तुभ्यं नम उक्तिं विधेम नमस्कारं च नमे❋ कुर्मः । इदमेवेदानीं परिचरणम् । क्षम-

❋ "नमस्कारवचनमेवकुर्मः" इति साधुः स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वेति भावः । अथोपास्यस्य परब्रह्मणो व्यापकत्वेऽपि यत्रोपासन-मुचित (तं) तन्देशमाह ।

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
यो सावादित्ये पुरुषः सो सावहम् ॐखं ब्रह्म ॥१७॥

हिरण्मयमिव हिरण्मयम्,ज्योतिर्मयत्वात् पात्रं सूर्यमण्डलम् तेन सत्यस्य परब्रह्मणः । "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः । तस्य मुखं द्वारमन्तरङ्गमादित्याख्यजीवरूपमपिहितम् आच्छादितम् । मण्डलदर्शनेनैव कृतार्थमात्मानम्मन्यमानस्तदात्मानमेव न जानाति तेजः पिहितत्वात् । कुतस्तरान्तदन्तर्यामिणम्परमात्मानमिति परमार्थः । किमिदानीमादित्यमण्डले द्वौपुरुषौस्तः,स्त एवेत्याह । यो ऽ साविति यो ऽ सौ आदित्ये आदित्यपदवाच्ये मण्डलाभिमानिनि जीवे पुरुषः अन्तर्यामी श्रुतः सः असावहमिति वेदान्तकर्तुर्वचनम् । तथा च श्रुतिः "य आदित्ये तिष्ठन्य आदित्यादन्तरो ऽयमादित्यो न वेदस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येषत आत्मान्तर्याम्यमृत" इति । अत एव "गुहां प्रविष्टावात्मानौ हि तद्दर्शना" दिति सूत्रम् । एकस्योपाधेरपि भेदकत्वानुपपत्ते ऽ नौपाधिकएव तयोर्भेद इति स्पष्टमेव प्रतिपादितम् । अत एव य आत्मनि तिष्ठन्नित्यादिकमप्यनुकूलम् । अनेनोपास्यस्वरूपमादित्यमण्डलादिर्देशश्चोक्तः । उपलक्षणमिदम् । रामकृष्णादिविग्रहाणामुपास्यदेशतायाः श्रुत्यन्तरोक्तत्वात् । ननु तथा भूतस्य कथमुपासनमित्याशंकायामाह । ॐ इति वाचकनिर्देशो ऽ यम् । तस्य वाचकः प्रणव इति पातञ्जल सूत्रात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ॐ मित्यकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमाङ्गतिम् ।।

तथा च प्रणवाभ्यास एव तदुपास– (न) मित्युक्तम्भवति । ननु किमादित्यस्य पुरुषः परिच्छिन्न इत्याशंकायामाह । खमिति आकाशनिष्टत्वेन व्यापक इत्यर्थः । य आकाशे तिष्ठन्नित्यादि श्रुश्रुतेः, एवं तर्ह्याकाशमेव स्यान्नेत्याह । ब्रह्मेति बृंहयति बर्द्धयति प्रजा इति ब्रह्म । सङ्कोचकप्रमाणाभावेन जन्यमात्र कारणमित्यर्थः । ननु करणत्वमन्वयव्यतिरेकगम्यम् । ईश्वरस्य च कालिकसंबन्धेन हेतुत्वं वाच्यम् । तादृशश्च व्यतिरेकोऽप्रसिद्धो नित्यत्वात् । कारणतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकस्यैव व्यतिरेकस्य कारणताऽकारणताग्रहोपयुक्तत्वात् । तत्कथं जगत्कारणत्वग्रह इति चेत् मैवम् । ईश्वरस्य कारणताया अन्वयव्यतिरेकविशिष्टप्रत्यक्षगम्यत्वानभ्युपगमात् । न सत्तन्नासदुच्यत-इति निषेधात्, सच्छब्दनान्वयि, असच्छब्देन व्यतिरेकि तद् ब्रह्म नोच्यत इति तदर्थात् । यद्यप्यन्वयीत्युच्यत एव । तथापि व्यतिरेक विशिष्टान्वयानङ्गीकाराद्देवमुक्तम् । तस्मादीश्वरस्य कारणत्वं शब्दमात्रगम्यम् । तच्च व्यतिरेकं निवापि, धर्मिग्राहक मानस्य तदुपादायैव पर्यवसानात् । तदुक्तमाचार्यैः—

पूर्वाभावो हि हेतुत्वं मीयते येन केनचित् ।
व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा न हि ।।

यत्तु ब्रह्म न सदादि– शब्दवाच्यं, जातिरहितत्वात्, नापि गुणशब्देन, निर्गुणत्वात्, नापि क्रियाशब्देन, निष्क्रियत्वात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"निष्कलन्निष्क्रियंशान्त" मिति श्रुतेः। नापि गोमानित्यादिबत्संबन्धि शब्देन, एकत्वादविषयत्वादात्मत्वाच्चेति। न केनचिच्छब्देनोच्यते, । "यतो वाचो निवर्तन्त" इति श्रुतेरिति। तन्न निर्गुणत्वे मानाभावात् "सत्यं विज्ञान" मित्यादिश्रुतेः। अद्वयत्वमपि न दूषितत्वात्। निष्क्रियत्वन्तु परिस्पन्दशून्यत्वरूपमङ्गीकुर्मः, विभुत्वेनात्मनि तदयोगात्। धात्वर्थशून्यत्वन्तु न, ज्ञानादेस्तथात्वे न निषेधानुपपत्तेः। एकत्वन्तु किं संख्यायोगित्वमुत द्वितीयनिष्ठात्यन्ताभावप्रतियोगिधर्मवत्वमाहोस्वित्स्वान्यशून्यत्वम्। नाद्यौ आकाशादेस्तादृशस्यापि पदगम्यत्वोपगमात्। न तृतीयः, असिद्धेः, ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादि प्रमाणविरोधादविषयत्वमप्यसिद्धमिति। यद्वा बृंहतीति ब्रह्म निरतिशयवृद्धिमत्वं सामान्यतो लक्षणन्तद्विशेषजिज्ञासायान्तु, यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतिप्रतिपादितञ्जगत्कारणत्वम्। इदमेव च प्रकृतित्वम् प्रकृष्टा कृतिर्यस्येति व्युत्पत्तेः प्रकृष्टत्वं च कृतौ कार्यासमवायिकरणसंयोगजनकक्रियानुकूलत्वम्। तच्चोपादानावि(शि)ष्टस्योपपन्नमतस्तज्ज्ञाने सति विशेषणांशस्योपादानस्य ज्ञातत्वादेकविज्ञाने सर्वं विज्ञानम्। मृत्पिण्डतद्विकारज्ञानरूपं दृष्टान्तञ्चोपपन्नम्। न तूपादानमात्र प्रकृतिरीश्वरप्रयत्नं। विनापि कार्यं प्रसङ्गादित्यावेदितं प्राक्। न च त्वन्मते सर्वदा कार्यप्रसङ्ग ईश्वरकृतेर्नित्यत्वादिति वाच्यम् जीवादृष्टस्य सहकारित्वात्। यस्य च क(का) दाचित्कत्वेनोक्तदोषानवकाशादिति। अयं ब्रह्मशब्दो रामशब्द पर्यायः, रमन्ते योगिनो यस्मिन्निति व्युत्पत्तेः श्रुतिसिद्धत्वात्। एवं कृष्णशब्दपर्यायः "कृषिर्भू-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाचकः शब्दोणश्च निवृत्तिवाचक : तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इति श्रुतेः। ऐक्यमत्र प्राधान्यमेव नातोऽद्वैतसिद्धिः एवं पुरुषोत्तमनारायणादि शब्दानामपि ब्रह्मशब्दपर्यायत्वं वेदितव्यम्।

वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि ।।
तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने ।।

इति गरुडपुराणवचनेन हरावेव ब्रह्मशब्दो मुख्योऽन्यत्र तदुपचारात्।

यस्मिन् प्रयुज्यमाने तु गुणयोगः सुपुष्कलः ।
तत्रैव मुख्यवृत्तोऽयमन्य (त्र) हयुपचारतः

इति गारुडवचनात्। नन्वेवं भगवति ब्रह्मशब्दस्य मुख्यत्वे तत्त एवेतरव्यावृत्तौ जन्माद्यस्य यत इति लक्षणमनर्थकमिति चेदुच्यते। सोमसूर्यादि व्यावृत्यर्थत्वात् तत्र निरतिशयगुणयोगित्वरूपबृहत्वाभावात्। द्विविधा हि ब्रह्मणो गुणाः स्वरूप निरूपका निरूपितस्वरूप विशेषकाश्च। तत्र सत्यज्ञानादयः स्वरूपनिरूपकाः यतो वा इमानीत्यादिभिस्तु जगत्कारणत्वादयो निरूपित स्वरूपविशेषका गुणा उच्यन्ते। तत्र स्वरूपलक्षणमपहाय विशिष्टलक्षणमादौ कुर्वता सूत्रकारेण विशिष्टस्यैवोपास्यत्वं ज्ञाप्यते जिज्ञासापि तस्यैव। विशेश्यांशस्य तु सत्यज्ञानादिकं लक्षणमिति। तत्र निरूपा(प)सत्तारूपं निर्विकारत्वं सत्यपदार्थः तेना चेतन-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्संसृष्टचेतनयोर्व्यावृत्ति निरूपपदत्वात्सत्यपदस्य । स्वरूपतो गुणतश्च नित्याशङ्कुचितप्रकाशत्वं ज्ञानपदार्थः तेन कदाचित्क्वचिदपि जडत्वन्नेति सिद्धम् । स्वरूपतो गुणतश्च देशकालवस्तुपरिच्छेदरहितत्वमन्तपदार्थ : । तत्रैवेदं नान्यत्रेति परिच्छेदानर्हत्वं देशापरिच्छेदः । इदानीमिदन्नान्यदेति परिच्छेदानर्हत्वं कालापरिच्छेदः । इदमिदन्नेति वस्तु परिक्छेदानर्हत्वं वस्तुपरिछेदः । वस्त्वन्तराभावरूपस्तु वस्त्वपरिच्छेदः । परेषामनुचितः ब्रह्मव्यरितिक्तस्याज्ञानस्य तत्कार्यस्य चाङ्गीकारात् । सत्यत्वञ्च त्रिविधिम् निर्विकारमभिव्यक्तम्प्रमेयञ्च । प्रमेयत्वस्यानुगतत्वेऽपि गोबलीवर्दन्यायेनोक्तिः । आद्य ब्रह्मकनिष्ठम् । द्वितीयं ब्रह्मणि चिदचिद्वारकम् । जीवे धर्मज्ञानद्वारकम् । असत्यमपि त्रिविधम्:– मिथ्याभूतं सविकारं सूक्ष्मं च । धर्मिनाशश्चेत्यपि केचित् । तत्राद्यमतस्मिंस्तद्भावे सर्वस्मिन्नेव शुक्तौ रजतस्येव । द्वितीयं जीवे कादाचित्कं जडे त्रैकालिकम् । तृतीयन्तु ब्रह्मैकनिष्ठमिति वदन्ति । परमाणुनिष्ठमपीति तु द्रष्टव्यम् । नरविषाणादौ तु न किञ्चिदपीति न्यायविदः । अत्र रामानुजाचार्या जडजीवयोर्द्रव्यत्वेऽपि ब्रह्मनिष्ठत्वाद्गुणत्वम् ।

सत्वं रज स्तमश्चेति विद्धि जीवगुणात्मकम् ।
जीवमात्मगुणं विद्यादात्मानम्परमात्मनः ।।इति स्मृतेः।।

जीवशब्दोऽत्र बुद्धिवचनः । अत एकोऽहं बहुस्यामित्यत्र जडजीवविशिष्टस्येव बहु भवनं न केवलस्येति सिद्धम् । अत एवाद्वितीयश्रुतिर्न गुणनिषधार्था, अपितु सदतिरिक्ताधिष्ठातृ निषेधार्था । कुत इदमवगम्यते तदैक्षत बहुस्यामिति चेतन धर्मेण वाचक-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पदश्रवणादिति ब्रूमः । "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामानिति श्रुतेः" विमतं सगुणम् । प्रकृतित्वात् यदेवं तदेवं यथा मृत्पिण्ड इति प्रयोगाच्च । न चाप्रयोजकं । यदि सगुणं न स्यात्प्रकृतिरपि न स्यात् । गुणद्वारैव हि प्रकृतित्वम् । नन्वेवं कर्तृत्वं नस्यादिति चेन्न । कार्यं कृतिजन्यं कार्यत्वात् । घटवदिति तत्सिद्धेः । अयमीक्षणधर्मो न गौणे गौणश्चेन्नात्म शब्दादिति प्रतिषेधात् । नन्वेतदीक्षणमदृष्टविशेषसचिवजीवधर्म त्वेप्युपपन्नमतो न तदरिक्तेश्वरसिद्धिरिति चेन्न । सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनानुप्रविश्य नामरूपे व्याकरणीति जडादिव जीवादप्यतिरेकोक्तेः । अयञ्च साकार एव पुरुषार्थहेतुः सहस्रशीर्षत्वेनोपक्रमात् । "पादोस्य विश्वाभूतानि" "अतोज्यायांश्च" इत्यादिना प्राकृताऽप्राकृतलोकद्वयाश्रयत्वाभिधानाच्च । वेदाहमेतमिति तस्यैव महापुरुषस्य तमेव विदित्वेत्यत्र परामर्शात् । "ब्रह्मण्यो देवकीपुत्र" इत्यादि श्रुतेः।"सुदुर्दर्शमिदं रूपं दृष्टवानसियन्मम" इति भगवदुक्तेश्च ।

अर्थितो मानुषेलोके जातो विष्णुः सनातनः

इमौ// स्य मुनिशार्दूलकिङ्करौ समुपस्थितौ ।

इति रामोक्तेश्चाप्राकृतदिव्यदेहत्वसिद्धेः । एतेनाविद्या संबन्धनिबन्धनविविधदेहदर्शनरूपभ्रान्ति सहितं ब्रह्मेतिनिरस्तम् । नन्वविद्यायामिथ्यात्वेन ब्रम्हणो नित्यशुद्धत्वमुपपयद्यत इति

// आर्षोऽयं प्रयोगः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चेन्न। तथा सति भेददर्शनरूपभ्रान्तेरसंभवात्। न हि तिमिरादि-दोषमिथ्यात्वे चन्द्रभेददर्शनरूपभ्रान्तेरुपपत्तिः। भेददर्शनस्यापि मिथ्यात्वान्नदोष इति चेन्न। चेन्न। भेद दर्शनस्य मिथ्यात्वे तन्निर्वर्तनार्थं श्रवणाद्यनर्थक्यात् तत्सत्यताभ्रमनिरासार्थत्वा-न्नवैयर्थ्यमिति चेन्न। ब्रह्मणो भ्रमरूपा शुद्ध्याश्रयत्वा योगात्। भ्रान्तेरपि। मिथ्या त्वेन ब्रह्मणि न तत्संबन्ध इति चेन्न श्रवणादिविधिवैय्यर्थ्यता दवस्थ्यात्। न च ब्रम्हप्रतिबिम्बानामविद्याश्रयत्वेन तद्गता विद्या निवृत्त्यर्थत्वान्न-वैयर्थ्यमिति वाच्यम्। प्रतिबिम्बजीवानां तद्गताविद्यायाश्च मिथ्यात्वेन तद्दोषतात (ता) दवस्थात्। कल्पितजीवानां स्वनाशप्रतिपादकमोक्षशास्त्राधिकारासंभवाच्च। न च ब्रम्हण एव कल्पितजीवविषयसत्यत्वप्रतिभाषसनिवर्तनार्थत्वान्न वैय्यर्थ्य-मिति वाच्यम्। एवं सति ब्रह्मज्ञान वादस्यैव परिगृहितत्वेन प्रतिबिम्बकल्पनानर्थक्यात् विपरितज्ञानस्यैवाशुद्धिपदार्थत्वेन ब्रम्हणो नित्यशुद्धत्वप्रतिपादकशास्त्रविरोधाच्च। तस्माद्भेद-ज्ञानमेव तत्वं ज्ञानम्। मोक्षहेतुश्च। तथा च मोक्षधर्मे सर्ववेदान्त-सिद्धान्तनिर्णये याज्ञवल्क्यः—

यदा तु मन्यतेऽन्योऽहमन्य एष द्विजर्षभः।
तदा स केवली भूतः षड्विंशमनुपश्यतीति॥

तस्मात्प्रकृतिपुरुषपुरुषोत्तमाः परस्परव्यावृत्तधर्मकास्त-त्वमि(ति) प्राहुः। तथा तत्रैव विश्वावसुं प्रति याज्ञवल्क्यः—

अबुध्यमानाम्प्रकृतिं बुध्यते पञ्चविंशकः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षड्विंशः पञ्चविंशन्तु चतुर्विंशञ्च पश्यति ।।
षड्विंशमनुपश्यन्ति श्रुतयस्त (त्) परायणाः ।इति।
एवंमप्रतिबुद्ध बुद्ध्यमानश्च (ञ्च) ते ऽ नद्य
बुद्ध श्चोक्तो मयातत्वं यथा श्रुतिनिदर्शनादिति ।

अयञ्च वास्तविक एव भेदः श्रुतिस्मृतिपुपराणेषु सूत्रेषु तत्वप्रकरण एवोपदेशात् । अभेदज्ञान्तु भ्रमः तथा च मोक्षधर्मे वशिष्ठ :–

अनेन साम्यं यास्यामि नानयाह मचेतसा ।
अयमेव. भवेद्बन्धुरनेन सह मे क्षमम् ।।
साम्यमेकत्वमायातो यादृशस्तादृशस्त्वहम् ।
तुल्यतामिहया (स्या) मि सदृशोऽह मनेन वै ।।
अयं हि विमलोऽव्यक्तमहमीदृशकस्तथा ।
एवं परमसम्बोधात्पञ्चविंशोऽनुबुद्धवानिति ।।

किं बहुना समस्तवेदान्तनिष्कृष्टार्थनिर्वचनपरेण सूत्रकारेणापि अदृश्यत्वादिगुणको धर्मोक्तेरित्यनेनाऽखण्डार्थवादो निराकृतः । विशेषणभेदव्यपदेशाच्च नेताविति जीवब्रह्मैक्यवादो निराकृतः । रूपोपन्यासाच्चेति निराकारवादो निराकृत इति मृषावादिदर्शनं सर्वमुत्सूत्रमिति मन्तव्यम् । अथ सगुणविद्याफलरूपेयं साम्यलक्षणा मुक्तिः शुद्धविद्या फलन्तु सायुज्यम् । ब्रह्मापि निर्गुणमेव ।

पुरूषं निर्गुणं सांख्यमथर्वशिरसो विदुः ।

'साक्षी चेता केवलो निर्मुणश्च निर्गुणम्प्रकृतेः परमित्यादि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नानाश्रुतिभ्यः। सगुणश्रुतिनां तूपासनोपयुक्तकल्पितार्थपरत्वात् । अपवर्गार्थिना तु गुणज्ञानमनुपादयमिति चेन्मैवम् । स एको ब्रह्मण आनन्दः, आनन्दं ब्रह्मणो विद्वान्—अपहतपाप्मा विरजो मृत्युः, सत्यकाम सत्यसंकल्पः, य इहात्मानमनुविद्य व्रजन्ति, एताँश्च कामाँस्तेषां सर्वेषु लोकेषु कामचारो भवति ।

परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।

तेजो बलैश्वर्यमहाविबोधसुवीर्यशक्त्यादिगुणैकराशिः ।।

शुद्धे महाविभूत्याख्ये परे ब्रह्मणि निष्कले ।

मैत्रेय भगवच्छब्दः सर्वकारणकारणे ।।

इत्यादि श्रुतिस्मृतिभिः सगुणत्वप्रतिपादनात् । स्वाभाविकत्वोक्त्या च गुणानां काल्पनिकत्वायोगात् । निर्गुणश्रुतीनां प्राकृतगुण निषेध परत्वात् ।

सत्वादयो न सन्तीशे यत्र च प्राकृता गुणाः ।

इत्यादिस्मृतेः—

शास्त्रं बुद्ध्वा न तत्वेन केचिद्वादबलाज्जनाः ।

ब्रह्मस्तेना निरानन्दा दंभलोभवशानुगाः ।।

नैर्गुण्यमेव पश्यन्ति न गुणाननुयुञ्जते ।

तेषां तमः स्वभावानां तम एव परायणम् ।।

इति नैर्गुण्यवादस्य भारत एव दूषितत्वात् परञ्ज्योतिक रूप संपद्य स्वेनरूपेणाभिनिष्पद्यत इति स्वरूपाऽविर्भावश्रवणात् । कार्यब्रह्मणश्चतुर्मुखादेः परं ज्योतिरशब्दवाच्यत्वासम्भवात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्य प्रसादजो ब्रह्मा रूद्रः क्रोधसमुद्भवः ।

इति महाभारतविरोधात् । 'निरस्तातिशयानन्दसुख-भावैक लक्षणा।' 'भेषजम्भगवत्प्राप्तिरेकान्तात्यन्तिकी मता' इति पराशरवचनेन सगुणब्रह्मप्राप्तेरेव मुक्तित्वाभिधानाच्च ननु

यदा सर्वे प्रमुच्यन्ते कामा यस्य हृदिस्थिताः ।

इत्यादिना कामनां त्याज्यत्वाभिधानात् । अत्रापि 'मागृधः कस्य स्विद्धन' मित्युक्तेः कथम्प्राप्यत्वमिति चेदित्थम् । सोऽश्नुते सर्वान् कामानित्यत्र ब्रह्मवेदनफलतयानुभाव्यत्वेन श्रुतानां कामानां त्याज्यत्वायोगात् । त इमे सत्याः कामा इति श्रुत्यन्तर-वैयर्थ्याच्च परमात्मनः कल्याणगुणा एवात्र कामशब्दवाच्या इति तदन्यकामानामेव त्याज्यत्त्वोपपत्तेः ननु फलदशायां गुण-प्राधान्यश्रवणा दुपासने गुणप्राधान्यं न सिद्धयतीति चेन्न,फलोपा-सनयोरेकप्रकारत्वात् । अनुपासितस्य प्राप्यत्वाभावात् । तदुक्तं भगवता–

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावित ।इति।

श्रुतिरपि–

यथा क्रतुरस्मिन् लोके पुरुषो भवति तथेतःप्रेत्य भवतीतिभू । किञ्च

न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि ।
वक्तुं शक्ता (क्याः) वियुक्तस्य सत्वाद्यैरखिलैर्गुणैः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादिमहाभारतादिवचनैर्भगवद्गुणानामनन्तत्वमप्राकृतत्वं निरवधिकातिशयवत्वञ्च सिद्धम् । अत्रापि कविर्मनीषीत्यादिना तद्गुणा एव प्रतिपाद्यन्त इति सगुणब्रह्मणोपासनमेव पुरुषार्थार्थिभिः कर्तव्यमिति सिद्धम् ।

बुधाः सुधातुल्यमिदंनराणामतत्पराणामपि मुक्तिबीजम् ।
श्रुतान्तसिद्धान्तकलापरूपं प्रलापतो वा कुरूतात्मकण्ठे ।।

ये कर्मैकपरा न चेशमनने तान्नास्तिकान् मन्महे
द्विष्मस्तानसतःकुतर्ककलनाद्वैनाशिकान् नास्तिकान् ।
ये ब्रह्मैक्यविदोऽथ जीवमतपस्ते त्वर्द्ध वैनाशिकाः
ये त्वात्मद्वयतत्व शुद्धमतयस्तानेव भूयः स्तुमः ।।

यदुक्तमत्रास्तिम (द) प्यपूर्वन्तदेव वीक्षानिकषेनिवेश्यम् ।
परीक्षकैर्वर्हिषिहेम यद्वत्परीक्ष्यते तस्य विशुद्धिहेतो :।।

श्रीराजराजेन्द्रधराधिपोऽयं श्रीराजराजेश्वरसेवनेन ।
निर्हृत्य चक्रम्प्रबलम्परेषां श्रीराजराजेश्वरतां वृणोतु ।।

यत्पूर्वजः क्षितिपतिर्मम पूर्वजेन
सम्पूजितो नवमितैर्निधिभिर्निबद्धैः ।
सोऽयं गतानुगतिकेन मयास्वकीय–
वेदान्ततत्त्ववचनैः परितोषितोऽस्तु ।।

यस्यामात्यो भीमसिंहोऽपि नूनं
पार्थभ्राता भीमसेनोऽवतीर्णः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कारङ्कारं शत्रुभङ्गप्रकारं
नीतेरङ्गान्यप्यभङ्गानि कुर्यात् ।।

इति श्रीकुर्माचलाखण्डलद्वारगीर्वाणगुरुश्रीमत्प्रेमनिधिपण्डितानुजश्रीहरिनिधिपण्डितात्मजश्रीरेवाधरपण्डितसूनुधरणीधरपन्तकृतावीशतत्त्वं समाप्तमगममत् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ईशावास्य उपनिषद्को सारांश

प्रथममन्त्र

मनुष्यका प्रति वेदभगवान्को यो आदेश छ कि सारा विश्व–ब्रह्माण्ड, चराचरात्मकजगत् तिमीले देखे सुनेका छौ र केहि अनुभव गरेका छौ । यो सबै सर्वाधार, सर्वनियन्ता,सर्वाधिपति, सर्वशक्तिमान,सर्वज्ञ,सर्वकल्याण गुण स्वरूप परमेश्वरले व्याप्त◇छ। यसको कुनै भागपनि उनबाट भिन्न छैन○।यस्तो जानेर परमेश्वरलाई नविर्सी तिमि यस संसारमा त्यागभावले केवल कर्तव्यपालनका निमित्त मात्र विषयको यथाविधि उपभोग गर अनधिकारचेष्टा नगर अर्थात् विश्वरूप ईश्वरको पूजाका

◇ मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।। (गीता ९।४)

○ यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ।। (गीता १०।३९)
अथवा बहुनैतेन किंज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।। (गीता १०।४२)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निमित्त मात्र कर्मगर । विषयमा मनलाई नफसाउ यसैमा तिम्रोकल्याणछ । वास्तवमा यी भोग्यपदार्थ कसैको होइनन् । मानव अज्ञानवस यसमा ममता र आशक्ति बढाउँछ । यी सवै ईश्वरका हुन् र उनैका निमित्त यिनिहरूको उपभोग हुनुपर्दछ ।

द्वितीयमन्त्र

समस्त जगत्का एकमात्र कर्ता, धर्ता, हर्ता सर्वशक्मिान सर्वमय परमेश्वरको निरन्तर संझना गर्दै सवै उनैको हो भन्ने संझी उनैको पूजाका निमित्त शास्त्रद्वारा निर्णीत कर्तव्यकर्म गर्दै सयवर्षसम्म बाँच्ने इच्छागर । यसरी आफ्नो साराजीवन परमेश्वरमा समर्पणगरीदेउ । यस्तो संझ कि शास्त्रविहित स्वकर्मको आचरण गर्दैजीवन निर्वाहगर्नु केवल यज्ञार्थ–परमेश्वरको पूजाका निमित्त हो भोगार्थ होइन । कर्मगर्दै रहेर

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ।। (गीता २।६४)
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थ व्यपाश्रयः ।। (गीता ३।१८)
यतः प्रवृतिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणातमभ्यर्च्य सिद्धिं विन्दति मानवः ।। (गीता १८।४६)

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

त्यसमा न मुछिने यही यौटा बाटो हो । यस भन्दा भिन्न अरू कर्मबन्धनबाट छुट्ने बाटो छैन ।

तृतीयमन्त्र

विभिन्न शरीरहरू भन्दा मानवशरीर श्रेष्ठ र परमदुर्लभछ । भगवान्‌ले विशेषदयागरी संसार-रूप–समुद्रबाट पार हुनलाई मानवशरीर प्रदान गर्नु-भएको हो । यो चोलालाई पाएर पनि मनुष्य आफ्नो कर्मलाई ईश्वरोपासनका निमित्त समर्पण गर्दैन र वासनातृप्तिलाइनै जीवनको परमलक्ष्य मानेर रिषया-शक्ति पट्टिनै ढल्कन्छभने त्यसले संसारमा जतिसुकै नाम, यश, वैभव वा अधिकार पाएको भएतापनि मरे-पछि कर्मको फलस्वरूप बार बार शूकरादि तुच्छयोनिमा र तीव्रकामक्रोधादिसंतप्त★ आसुरीयोनिमा घुमीरहनु

★ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ।। (गी. २।५०)
कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनिषीणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् (गी. २।५१)
ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिबाम्भसा ।। (गी. ५।१०)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पर्दछ❀। यसैले भगवान् श्रीकृष्णले गीतामा भन्नुभएको छ आफ्नो उद्धार आफैले गर्न पर्दछ। ।

चतुर्थ मन्त्र

सर्वान्तर्यामी सर्वशक्तिमान् परमेश्वर अचल र एक छन् तापनि मनभन्दा पनि वेगवानछन् । जहाँसम्म मनपुग्न खोजदछ त्यस ठाउंमा ईश्वर पहिल्यै देखि विद्यमानछन् । परमात्मा सबभन्दा पहिलेका र ज्ञान-स्वरूपछन् अथवा सबभन्दा जेठा हुनाले सबैलाई चिह्निसकेकाछन् । उनलाई देवता-ऋषिहरूले पनि राम्रोसंग चिन्हेकाछैनन्● । छिटो हिड्ने बुद्धि, मन र इन्द्रियहरू वा वायु आदि देवता छन् , ती सबै आफ्नो शक्तिभर अनुसन्धानमा सदा सर्वदा दौड–धूप गर्दछन्; तर परमेश्वर नित्य अचल भएर पनि ती सब-लाई पार गरेर अगाडि निकलन्छन् । ती सब त्यहाँसम्म

❀ अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ।। (गी. १६।१६)
आसुरीं योनिमापन्नामूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ।। (गी. १६।२०)

उद्धरेदात्मनाऽऽत्माऽऽनं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।। (गी. ६।५)

● न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ।। (गी. १०२)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुग्न सक्तैनन् । असीमको सीमाको पत्ता ससीमले कसो गरी लगाउने ? वायु आदि देवतामा जुन शक्ति छ त्यस-द्वारा उनीहरू जलवर्षण, प्रकाशन, प्राणी–प्राण धारण आदि कर्म गर्न समर्थ हुन्छन्, ती अचिन्त्य शक्ति परमे-श्वरको शक्तिका एक कण मात्र हुन् ।

पञ्चममन्त्र

परमेश्वर गतिमान् पनिछन्, अचल पनि, एकै कालमा परस्पर विरोधी भाव, गुण तथा क्रिया जसमा रहन सक्तछ त्यसैलाई ईश्वर भन्दछन् । यो उनको अचिन्त्य शक्तिको महात्म्य हो । यो पनि भन्न सकिन्छ भगवान् आफ्नो दिव्य लीलाधाममा परम प्रिय भक्त जनलाई सुखी गराउन अप्राकृतिक सगुण साकार स्व-रूपमा प्रकट भएर लीला गर्दछन्, त्यो उनको गतिमान् अवस्था मानौं, निर्गुण रूपले सदा-सर्वदा अचल स्थिर-छन् त्यो उनको स्थिर रूप मानौं । ईश्वर जहाँ तहीं परिपूर्णछन्, यसैले टाढा–टाढा पनि विद्यमान्छन् साथसाथै पनि । यस्तो कुनै स्थान छैन जहाँ ईश्वरको सत्तानहोस् । यसैले ईश्वरलाई अन्तर्यामी भन्दछन् । अन्तर्यामी हुनाले परमात्मा नजिकैछन् । अज्ञानीले परमात्माको यस तथ्यलाई चिन्दैन, अतः उसबाट ईश्वर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धेरै टाढा रहन्छन् । वास्तवमा परमात्मा समस्त जगत्का परम आधार हुन् र परम कारण पनि हुन्, यसैले बाहिर र भित्र सबै ठाउँमा परिपूर्णछन् ।

षष्ठमन्त्र

यसरी जुन मनुष्य प्राणीमात्रलाई सर्वाधार परब्रह्म परमात्मा देख्दछ र सर्वान्तर्यामी प्रभुलाई प्राणी मात्रमा देख्दछ भने त्यसले कसमा घृणा द्वेष गर्ला ? त्यो त सर्वत्र आफ्ना परम प्रभुको दर्शन गर्दै मन-मनै प्राणी मात्रलाई प्रणाम गरिरहन्छ । सदा प्राणी मात्रलाई सुख दिनु उसको लक्ष्य हुन्छ ।

सप्तममन्त्र

यसरी उपासकले परमात्मालाई यथार्थमा चिन्दछ, त्यसपछि उसको सबैमा भगवद्दृष्टि हुन्छ र प्राणी मात्रमा एक मात्र तत्व परमात्मालाई मात्र ऊ देख्न लाग्दछ । त्यस्तो व्यक्ति अर्काले देख्दा कर्ममा रत भए तापनि

मत्तः परतरं नान्यत्किञ्चिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।। (गीता ७।७)

सर्वभूतस्थमात्मानं सर्वभूतानि चाऽऽत्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्रसमदर्शनः ।। (गीता ६।२९)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वस्तुतः ऊ आफ्नो प्रभुमा नै क्रीडारत रहन्छ ।[*] उसका निमित्त प्रभु र प्रभुको लीलाभन्दा अरु केही रहँदैन ।

अष्टममन्त्र

उपर्युक्त वर्णनानुसार सर्वत्र जान्ने–देख्ने महापुरुष-ले परब्रह्म, पुरुषोत्तम, सर्वेश्वरलाई प्राप्त गर्दछ । ती परमात्मा कस्ता छन् भने, शुभाशुभ कर्मजनित प्राकृत सूक्ष्म शरीर तथा पाञ्च भौतिक अस्थि–शिरा–मांसादि-मय षड्विकारयुक्त स्थूल शरीरले रहित, छिद्ररहित दिव्य शुद्ध सच्चिदानन्दघन एवं क्रान्तदर्शी सबैलाई जान्ने र आफ्नो नियन्त्रणमा राख्ने सर्वाधिपति स्वयं कर्मवसमा नरहने, इच्छानुसार प्रकट हुने । त्यस्तै सनातन कालदेखि अखिल प्राणिलाई उनका कर्मानुसार समस्त पदार्थहरू यथायोग्य रचना र विभाग व्यवस्था गर्दै आएका छन् ।

नवममन्त्र

जुन मनुष्य सांसारिक भोगमा आशक्त भएर भोग प्राप्तिको साधनरूप अविद्याका विविध प्रकारका कर्म गर्दै रहन्छन्, ती व्यक्ति आफ्नो कर्मको फलस्वरूप

---

[*] सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ।। (गीता ६।३१)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अज्ञानान्धकारले परिपूर्ण भएर नाना योनिमा जन्म लिदै भोग्दै घुमिरहन्छन् । ती मनुष्य जन्मको चरम र परम लक्ष्य श्रीपरमेश्वरलाई नपाएर निरन्तर जन्म–मृत्युरूप प्रवाहमा डुबुल्की लगाउँदै नाना तापले संतप्त भै रहन्छन्।

दशममन्त्र

नित्यानित्य वस्तुको विवेक, क्षणभंगुर, नाशवान, अनित्य यस लोक र परलोकका भोग सामग्री र त्यसका साधनबाट पूर्ण वैराग्य, संयमपूर्वकको जीवन र एकमात्र ईश्वर चिन्तनमा लागिरहनु नै सर्वोत्तम फल प्राप्त गराउने ज्ञानको यथार्थ स्वरूप हो । यस अनुष्ठानबाट परब्रह्म पुरुषोत्तम सम्बन्धी यथार्थ ज्ञान हुन्छ र त्यसपछि ईश्वर प्राप्ति हुन्छ ।✡ ज्ञानाभिमानी अहंकारी दम्भी स्वेच्छाचारी मनुष्यलाई जुन दुर्गतिरूप फल प्राप्त हुन्छ, यथार्थ ज्ञानभन्दा त्यो सर्वथा भिन्न र विलक्षण हुन्छ ।

✡ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ।। (गी. १८।५३)
ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ।। (गी. १८।५४)
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ।। (गी. १८।५५)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकादशमन्त्र

कर्म र अकर्मको यथार्थ रहस्य संझनलाई ठूला–ठूला विद्वान्हरूले पनि भूल गर्दछन् ।[१] यसै कारणले कर्मको रहस्य नबुझ्ने ज्ञानाभिमानी मनुष्यलाई कर्म ब्रह्मज्ञानको बाधक संझिएर आफ्नो वर्णाश्रमोचित आवश्यक कर्म समेत त्यागदछन् । तर यस प्रकारको त्याग बाट पाउने फलले कर्म बन्धन बाट मुक्ति पाउन सक्तैन [२]। यसै गरी ज्ञान (अकर्मावस्था–नैष्कर्म्य) को तत्त्व न संझनाले मनुष्य आफूलाई ज्ञानी र संसार बाट धेरैमाथि उठेको मान्दछन् । अतः ती मनुष्य आफूलाई पुण्य र पाप बाट अलिप्त मानेर मन्परि गर्दछन् । वा कर्मलाई भारस्वरूप मानेर कर्म गर्न छोड्दछन् र निद्रा भोगविलास आलस्य तथा प्रमादमा परेर आफ्नो दुर्लभ मानव जीवनको अनमोल समयलाई नष्ट गर्दछन् ।

द्वादशमन्त्र

मनुष्यहरू नाशवान् पुत्र, धन, स्त्री, मान, कीर्ति, अधिकार आदि यस लोक र परलोकका भोग सामग्रीमा

---

[१] किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसे शुभात् ।। (गी. ४।१६)

[२] दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ।। (गी. १८।८)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अ: क्त भएर त्यसैलाई सुखको मूल कारण मान्दछन् र त्यसैको उपार्जन सेवनमा दत्तचित्त भै रहन्छन्। उपरोक्त भोग्यवस्तुको प्राप्ति र संरक्षण एवं वृद्धिका निमित्त विभिन्न देव–देवीहरूको उपासना गर्दछन् र स्वयं जन्म-मरणका चक्रमा परेर घुमिरहेका हुनाले शरीरका दृष्टि-बाट विनाशशील छन्। उपर्युक्त भोगाशक्त मनुष्य आफ्ना उपासनाको फलस्वरूप विभिन्न देवताका लोकमा र नाना भोग योनीमा पुग्दछन्। यही नै तिनीहरूले घोर अन्धकारमा प्रवेश गर्नु हो।

त्रयोदशमन्त्र

परब्रह्म पुरुषोत्तम भगवान्लाई सर्वशक्तिमान् सर्वज्ञ, सर्वाधार, सर्वमय, सारा संसारका कर्ता, हर्ता, अविनाशी संझिएर भक्ति र श्रद्धामा चुर्लुम्म डुबेर प्रेमपूर्णहृदयले निरन्तर दिव्य मधुरनाम संकीर्तन र रूप, लीलाको स्मरण आदि गर्दै रहनु नै अविनाशी ब्रह्मको उपासनाको वास्तविक रूप हो। यस प्रकारको उपासना बाट उपासक लाई चाडै नै ईश्वरप्राप्ति हुन्छ।❀

❀ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ (गी. ९।३४)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ईश्वरोपासनाको मिथ्या आडम्बर गर्ने आडम्बरीलाई प्राप्त हुने फल भन्दा सच्चा उपासकले पाउने फल बिल्कुलै भिन्न हुन्छ ।

चतुर्दशमन्त्र

परब्रह्म पुरुषोत्तम नित्य अविनाशी सर्वव्यापीं, सर्वशक्तिमान, सर्वाधिपति, सर्वात्मा, सर्वश्रेष्ठ हुन् भन्ने जानेर; परमेश्वर नित्य निर्गुण (प्राकृतगुणले रहित) र नित्य सगुण (स्वरूपभूत दिव्य कल्याण गुणले विभूषित) छन् । साथसाथै देवता, पितृ, मनुष्य आदि जति पनि छन् तिनीहरूका अनुरूप भोग सामाग्रीहरू छन् । ती सबै विनाशशाली, क्षणभंगुर, जन्म–मृत्युरूप चक्रमा सदा भ्रमणशील हुने हुनाले यी सबै दुःखका कारण हुन् भन्ने जसले सम्झिन्छ । यसमा जुन सत्ता स्फूर्ति, शक्ति छ त्यो सब भगवान्को हो र उनको जगच्चक्रलाई सुचारू-रूपले चलिरहोस् भन्नका निमित्त यथा स्थान यथा योग्य सेवा पूजा आदि गर्दै रहने शास्त्रले आज्ञा दिएका छन्, शास्त्र सबै भगवान्का बाणी हुन् । इहलौकिक र पार-लौकिक देव–पितृ आदिका भोगमा आशक्त नभै कामना ममता आदिलाई हृदय बाट निकालेर उपर्युक्त सबैको शास्त्रोक्त रीतिले जसले पूजा–आजा गर्दछ त्यस बाट

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्यस उपासकको जीवन यात्रा आनन्द पूर्वक चल्दछ। यस हिसावले सेवा–पूजा गर्ने उपासकको आन्तरिक विकारनाशभै अन्त:करण शुद्ध हुन्छ र भगवत्कृपाले त्यो व्यक्ति मृत्युमय संसार–सागर बाट पार हुन्छ। विनाशशाली देवादिको निष्काम उपासनाका साथसाथै अविनाशी परात्पर प्रभूको उपासना बाट उपासकले चाँडै नै अमृतरूप परमात्मालाई भेटाउँदछ।

पञ्चदशमन्त्र

परम धामको यात्री त्यो साधक आफ्नो प्राण–इन्द्रिय र शरीरलाई आफू भन्दा सर्वथा भिन्न मानेर ती सबैलाई आफ्ना-आफ्ना उपादान तत्वमा सदाका लागि विलीन गराएर एवं स्थूल र सूक्ष्म शरीरको विघटन गर्न खोज्दछ। यसै निमित्त भन्दछ प्राणादि समस्त वायु आदिमा पसून् र स्थूल शरीर डढेर खरानी हवस्। फेरि त्यो आफ्ना आराध्य देवसंग भन्दछ हे यज्ञमय विष्णु–सच्चिदानन्द विज्ञान स्वरूप परमेश्वर! तपाई आफ्नो आत्मीय मलाई र मेरो कर्मलाई सम्झनु होस्। तपाईं स्वभावले नै मेरो र म बाट बनेको भक्तिरूप कार्यको सम्झना गर्नु हवस्। किन कि तपाईंले नै भनेको छ––

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"अहं स्मरामि मद्भक्तं नयामि परमां गतिम्" म आफ्ना भक्तलाई सम्झन्छु र परम गतिमा लैजान्छु ।

यसै अभिप्रायले भक्त फेरि भन्दछ भगवन् तपाई मेरो र मेरा कर्मको संझना गर्नु हवस् । अन्तकालमा म तपाईको संझनामा आएँ भने निश्चय नै तपाईको सेवामा पुग्ने छु ।

षोडशमन्त्र

उपासक भन्दछ हे अग्निदेव ? म अब आफ्ना परम आराध्य देवका सेवामा पुगेर सदाकालागि उनैका सेवामा बस्न चाहन्छु । सुन्दर मङ्गलमय उत्तरायणका बाटा बाट भगवानका परम धाममा मलाई पुऱ्याइ दिनु हवस् । किन कि तपाई मेरा कर्महरु सबै जान्नु हुन्छ । मैले जीवन भर भगवानको भक्ति गरेको छु र उनैका कृपाले अहिले पनि ध्यान नेत्र द्वारा भगवान्को दिव्य स्वरूपको दर्शन र नामोच्चारण गर्दै छु । मलाई अधिकार छ कि म यसै बाटा बाट जाऊँ । त्यसो भएतापनि मेरो कुनै कर्म शेष भएर त्यो बाटो बाट जान प्रतिबन्ध हुन्छ भने त्यो पनि तपाईंले नाश गरी दिनु हवस । म बार बार तपाईलाई नमस्कार गर्दछु ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तदशमन्त्र

हे भगवन् ? तपाई अखिल ब्रह्माण्डका पोषक हुनुहुन्छ तपाई बाटनै सवैको भरण पोषण हुन्छ । तपाईको भक्ति नै सत्य धर्म हो र म सदा त्यसैमा संलग्न छु, अत एव मेरो मनोरथ पूर्ति तपाई बाट हवस । तपाईको दिव्य श्रीमुख–सच्चिदानन्द स्वरूप प्रकाशमान सूर्यमण्डल तुल्य चमकिलो ज्योतिर्मयी यवनिकाले ढाकिएको छ । म निरावरण (खुला) दर्शन गर्ने इच्छा गर्दछु । तपाईका समीपमा पुगेर निरावरण दर्शन गर्नलाई परिआउने जति बाधाहरू छन् ती सवैलाई मेरा निमित्त पन्छाएर आफ्नो वास्तविक स्वरूपको दर्शन दिनु हवस ।

देवीप्रसाद लंसाल

सं. २०२२।३।२९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नेपाल राष्ट्रियपुस्तकालयका अन्य प्रकाशनहरू

पुस्तकको नाम	सजिल्द	अजिल्द
१. जगन्मोहनम् (पहिलो भाग)	१०।	६।
.२ संवित्प्रकाशकाव्यम्		२।
३. भाषावंशावली (पहिलो भाग)		२।५०
४. जगन्मोहनम् (दोस्रो भाग)	१०।	६।
५. बौद्धदर्शन सूचीपत्र (पहिलो भाग)		२।
६. ज्योतिष सूचीपत्र (दोस्रोभाग)		२।
७. प्रशस्ति-रत्नावलि		१।
८. ज्योतिष सूचीपत्र (तेस्रो भाग)		

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्री ५ को सरकारको छापाखाना ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection